६४ पत्राणि

७७१-

नं० १घ

कुवलयानन्दः ~~(संपूर्णम्)~~ अलंकारशास्त्र

नं० ७७१ - घ

पत्राणि ६४ (सम्पूर्णम्)

कर्त्ता अप्पय्यदीक्षितः

कुवलयानंदमूलंप० ६४

७७१

अन्यार्थ तामेव पंकज... ...णम् मालंकारः परिणामः क्रियार्थश्चेद्विषयी विषयात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ... एतद्विशेषणं ... तच्चेयादि
तने नामिद्यमानाओ... ...गंता तं तु कृष्णातीति प्रेयोलंकारोपि ति के प्य:

कु० नं०
१

श्रीमते रामानुजाय नमः अमरीकबरीभारभ्रमरीमुखरीकृतम् दूरीकरोतु दुरितं गौरीचरणपंकजम् १ परस्परतपःसंपत्
फलायितपरस्परौ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः २ उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि
यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ३ अलंकारेषु बालाना
मवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४ येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः
एव ते प्रायस्तेषामितरेषां त्वभिनवा विरच्यंते ५ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते कीर्तिः स्वर्गंगामव
गाहते १ यत्रोपमानोपमेययोः सादृश्यलक्ष्मीः सहृदयहृदयाह्लादकत्वेनोद्भूततया चोल्लसति व्यंग्यमर्यादां वि
ना स्पष्टं प्रकाशते तत्रोपमालंकारः हंसीवेत्युदाहरणम् इयं च पूर्णोपमेत्युच्यते हंसी कीर्तिः स्वर्गंगावगाहनं इव शब्दा
द्वयोस्तेषामुपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामप्युपादानात् यथा वा गुणदोषौ बुधो गृह्ण
न्निंदुक्ष्वेडाविवेश्वरः शिरसा श्लाघते पूर्वं परं कंठे नियच्छति अत्र यद्यप्युपमानोपमेययोर्नैकः साधारणो धर्मः उप
मानेश्वरे चंद्रगरयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसा श्लाघनं वहनमुत्तरस्य गरस्य कंठे नियमन राम
१

नं स्थापनम् उपमेयेऽत्र धेगुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं शिरःकंपेनाभिनंदनम्
उत्तरस्य दोषस्य कंठे नियमेकं तदुपरि वाचानुद्घाटनमिति भेदात् तथापि चंद्रगरयोर्गुणदोषयोश्च बिंबप्रतिबिंब भावेना
भेदात् उदर्शन ज्ञानादीनां पृथक् लित्याद्येकशब्दोपादानेनाभेदाध्यवसायात् साधारणधर्मत्वेति पूर्वस्माद्विशेषः वस्तुतो
भिन्नयोरपि उपमानोपमेयधर्मयोः परस्परं सादृश्यादभिन्नयोः पृथगुपादानं बिंबप्रतिबिंबभाव इत्यालंकारिकसमयः
त्रयाणामुपमानधर्माणामुपमावाचकस्य च एकद्वित्र्यनुपादाने भिन्ना लुप्तोपमाष्टधा २ तडिद्गौरीं दुग्धतुल्यास्या कर्पू
रंती दृष्टो मम कोऽस्या स्मरवध्यन्ती दृष्टा तन्वी रहो मया ८ यत्तयामेलनं तत्र लाभो मे यश्च तद्रतेः तदेतत्काकता
लीयमवितर्कितसंभवम् ९ उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां वा प्रतिपादकशब्दाभावे न लुप्तोपमेत्यु
च्यते सा चाष्टधा यथा वाचकलुप्ता १ धर्मलुप्ता २ धर्मवाचकलुप्ता ३ वाचकोपमेयलुप्ता ४ वाचकोपमानलुप्ता ५
उपमानलुप्ता ६ धर्मोपमानलुप्ता ७ धर्मोपमानवाचकलुप्ता चेति तत्रोपमानलोपरहितास्तत्वारो भेदास्तडि
द्गौरीत्यादिश्लोकेन दर्शिताः तदन्यो भेदा उत्तरश्लोकेन दर्शिताः तडिद्गौरीत्यत्र वाचकलोपः तडिदिवगौरीत्यर्थेत्तु

उपमानलुप्तवंतः १

त्रामालंकार

कु०नं०
२
2

पमानानि सामान्यवचनैरिति समासविधायकशास्त्रकृतः इंदुतुल्यास्येत्यत्र धर्मलोपस्त्वैच्छिकः शास्त्रकृतः कांत्येंदु न१
तुल्यास्येत्यपि वक्तुं शक्यत्वात् कर्पूरंतीत्यत्र धर्मवाचकलोपः कर्पूरमिवाचरंतीत्यर्थे विहितस्य कर्पूरखदानंशात्मकाचारा
र्थस्य क्विपः इवशब्देन सह लोपात् अत्र धर्मलोपस्त्वैच्छिकः नयनयोरानंदजनकतया कर्पूरंतीति तदुपादानस्यापि संभ
वात् कांत्या स्मरवधूयंतीत्यत्र वाचकोपमेयलोपः अत्र कांत्येति विशेषणसामर्थ्यात् स्वात्मानं कामवधूमिवाचरंतीत्यर्थ
स्यागम्यमानतया स्वात्मन उपमेयस्य सहोपमावाचकेनानुपादानात् स त्वैच्छिकः स्वात्मानं स्मरवधूयंतीत्युपमेयोपा (
दानस्यापि संभवात् काकतालीयेत्यत्र काकतालशब्दौ वृत्तिविषये काकतालसमवेतक्रियावर्तिनौ तेन काकागम
नमिव तालपतनमिव काकतालम् इतीवार्थे समासवृत्तद्धिषयादिति ज्ञापकात् समासः उभयत्रोपमेयं त्वस्य कस्यचिद्गमनं
रहसि तन्व्या अवस्थानं यत्तेनाम्यस्य तन्व्याश्च समागमः काकतालसमागमसदृश इति फलति ततः काकतालमिव काक
तालीयम् इति द्वितीयस्मिन्निवार्थे समासाद्वृत्तद्धिषयादिति सूत्रेण इवे प्रतिकृतावित्यधिकारस्थेन छप्रत्ययः त
याच पतनदलितं यथा तालफलं काकेनोपभुक्तं एवं रहोदर्शनं तु भितदृद्यातन्वीस्वेनोपभुक्तेति तदर्थः तत्र

राम
२

अत्र काकागमनतालपतनसमागमरूपस्य काककर्तृतालोपमेयस्य चोपमानस्यानुपादानात् प्रत्ययार्थो
मा पमायामुपमानलोपः सैवार्थोपमायां वाचकोपमानलोपः सर्वोप्ययं लोपः क्व प्रत्ययविधायकस्य स्वरूपतः
अप्रवितर्कितसंभवमिति साधारणधर्मस्यानुपादाने प्रत्ययार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां
धर्मोपमानवाचकलोपः इति सद्भिरवधातव्यम् एतेषामुदाहरणान्तराणि विस्तरभियानालिख्यंते उपमा
नोपमेयत्वे यदेकस्यैव वस्तुनः इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः १ एकस्यैव वस्तुन उपमानोपमेयत्वव
र्णनमनन्वयः वर्ण्यमानमपि स्वस्वेन साधर्म्यं नान्वेतीति निरुच्यते अनन्वयिनोप्यर्थस्य प्रतिपादनं स
दृशांतरव्यवच्छेदेनानुपमेयत्वद्योतनाय इंदुरिंदुरिव श्रीमानित्युक्ते श्रीमत्त्वे इन्दुसमानान्यः सदृशोस्तीति सद
दृशांतरव्यवच्छेदो लभ्यते ततश्चास्येनापि सादृश्यासंभवादनुपमेयत्वे पर्य्यवसानम् यथा गगनं गगनाका
रं सागरः सागरोपमः रामरावणयोर्युद्धं रामरावणयोरिव पूर्वोदाहरणे श्रीमत्त्वस्य धर्मस्योपादानमस्ति इह तु ग
गनादिवैपुल्यादेर्धर्मस्य तन्नास्तीति विशेषः पर्य्यायेण द्वयोस्तच्चेदुपमेयोपमा मता धर्मोर्थ इव पूर्णश्रीरर्थोप

कु० नं० २ र्म्मेरवत्वपि द्वयोः पर्य्यायेण उपमानोपमेयत्वकल्पनं तृतीयसादृश्यव्यवच्छेदार्थं धर्म्मार्थयोर्हि कस्याचि
त्केनाचित्सादृश्ये वर्णिते तस्यान्येन सादृश्यमर्थसिद्धमपि मुखेनो वर्णनीयं तृतीयसादृश्यव्यवच्छेदा
यथा र्थफलतीति खमिव जलं जलमिव खं हंसरवचंद्रश्चंद्र इव हंसः कुमुदाकारास्तारास्ताराकाराणि कुमु
दानि पूर्णेन्दुपूर्णश्रीरिति धर्म उपात्त इह तु निर्मलत्वादिधर्मो नोपात्त इति भेदः उदाहरणद्वयेपि प्रकृ
तयोरेवोपमानोपमेयत्वकल्पनम् राज्ञीधर्मार्थसमरूः शरदि गगनसलिलादिनैर्मल्यस्य वर्णनी
यत्वात् प्रकृताप्रकृतयोरप्युपमा संभवति यथा वा गिरिरिव गजराजो यं गजराजवदुच्चकैर्विभाति
गिरिः निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति प्रतीपमुपमानस्य उपमेयत्वकल्पनम् त्वल्लो
चनसमं पद्मं त्वद्वक्त्रसदृशो विधुः प्रसिद्धोपमानोपमेयत्वप्रातिलोम्यात्प्रतीपं यथा वा यत्वन्ने
त्रसमानकान्ति सलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी येपि त्वद्गमना
नुसारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते अन्योपमेयलाभेन राम २

विच्छित्तिविशेषश्चमत्कारोत्कर्षः उत्कृष्टस्योपमानतिरस्कारातिशयप्रतीतेरिति भावः २

वर्ण्यस्यानादरश्चतत अलं गर्वेण तेनाब्ज कान्त्या चन्द्रोपि तादृशः । अत्युत्कर्षगुणेन तया वर्ण्यमानस्यान्यत्र स्वसादृश्य
मसहमानस्योपमेयं किंचित्त्वद्दर्पतावत्तावत्तस्य तिरस्कारो द्वितीयं प्रतीपं पूर्वस्मादपि विच्छित्तिविशेषशालि यथा वा
गर्वमसंभाव्यमिमं लोचनयुगलेन किं वहसि भद्रे संतीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि वर्ण्योपमेय
लाभेन तथान्यस्याप्यनादरः कः क्रौर्यदर्पनिर्मत्स्योत्वत्तुल्याः सन्ति हि स्त्रियः अत्युत्कर्षगुणेन तया क्वचिदुप
मानभावमसहमानस्य वर्ण्यस्य वर्ण्यमुपमेयं परिकल्प्य तावन्मात्रस्य अपि तिरस्कारः पूर्वप्रतीपवैपरीत्येन तृतीयं
प्रतीपं यथा वा अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ननु सन्ति भवादृशानि भूयो भुवने
ऽस्मिन्वचनानि दुर्जनानाम् वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्चतत मुधापवादो मुग्धाक्षि त्वन्मुखाभं कि
लाम्बुजं अवर्ण्यं वर्ण्योपमित्यनिष्पत्तिवचनं पूर्वेभ्य उत्कर्षशालि चतुर्थं प्रतीपं उदाहरणे मुधापवादत्वोक्त्या उपमि
त्यनिष्पत्तिरुक्ता इति यथा वा आकर्णय सरोजाक्षि वचनीयमिदं भुवि शशाङ्कस्तव वक्त्रेण पामरैरुपमीयते । व
प्रतीपमुपमानस्य कैमर्थ्यमभिमन्यते इदं चेदृक्तरं तस्याः किं परेण किमिन्दुना उपमेयस्यैवोपमानत्रैमौजैकैर्व

अलीकतया निंदितम् २
उपमानतिरस्कारातिशयप्रयोजकरूपदर्पः २

नगर्व:

केयूर्पर्यस्तकारे त्वाकुंडलनात २ | स्वोपरकृत्त्विषिवशीकरणमिति पावत २

प्रतिकूलत्वात्प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वम् । | हेतुना ४ रूप्यतेस्सरव्यादत तया ताप्यते धर्मास्त्रिने तु ति रूपं तद्रूपमस्या

तत्कार्यकारित्वेन १

कु० नं० ५ — हत्वेनोपमानप्रातिलोम्यात् पंचमं प्रतीपम् यथा वा तदोजसस्तद्यशसः स्थिता विमौ वृथेति चित्ते कुरुते यदा यदा तनो | सौ तद्रूप तस्य

तिभानोः पतिर्वेधकैतवात्तदा विधिः कुंडलतां विधोरपि केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेन तदंतर्भावं | भावत्ता कुप्यते

मन्यंते अन्येतु पंचमं प्रतीपप्रकारमुपमानापेक्षरूपत्वादाक्षेपालंकारमाहुः विषय्यभेदताद्रूप्यरंजनं विषयस्य | दुकार्यकारित्वा दि २

यत् रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते

विनाशंभुस्तार्तीयीकं विलोचनम् १८ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् अस्या मुखेंदुना लब्धे ने

त्रानंदे किमिंदुना १९ साध्वीयमपरा लक्ष्मीरसुधासागरोदिता अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरिच्य | निःकलंक

ते २० विषय्युपमानभूतं पद्मादि विषयस्तदुपमेयं मुखादि विषयिणोभेदेन ताद्रूप्येण च विषयस्य रंजनं रू | त्वमाधिक्यम | बलीत्वमी: इ

पवत्करणं रूपकम् अन्यरूपेण रूपवतः करणात् तत्र क्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदे प्र

तीयमान एव तदीयधर्मारोपमात्रपर्यवसितं ततश्च रूपकं तावद्द्विविधम् अभेदरूपकं ताद्रूप्यरूपकं | राम

मिति द्विविधमपि प्रत्येकं त्रिविधम् प्रसिद्धविषय्यापेक्षयाधिक्यवर्णनेन न्यूनत्ववर्णनेनानुभयोक्त्या चेति रू | ५

वर्णनीये

पकं षष्ठम् अयं हि इत्यादि सार्धश्लोकेनाभेदरूपकाणि अस्यामुखेंदुनेत्यादि सार्धश्लोकेन ताद्रूप्यरूपका
णि चाधिकन्यूनत्वानुभयोक्त्या दृष्टान्तक्रमप्रातिलोम्येनोदाहरणानि येन दशधा इति विशेषतो न वर्णनीये रात्तिप्र
सिद्धशिवाभेदं जनार्द्धिवस्य पूर्वावस्थातो वर्णनीय राजभावावस्थायां न्यूनत्वाधिकत्वयोर्वर्णनान्नुभ २३
याभेदरूपकमाद्यम् तृतीयलोचनप्रहाणोक्त्या पूर्वावस्थातो न्यूनत्वादर्शनान्न्यूनाभेदरूपकं द्वितीयम् न्यू
नत्ववर्णनमपि उभयाभेदस्तार्थ्यापारकत्वाद्यमत्कारकारी विषदृष्टित्यागेन जगद्रक्षकत्वोत्कर्षाशिवरूप म
र्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्षविभावनाद्वाधिकाभेदरूपकं तृतीयम् एवमुत्तरत्र ताद्रूप्य द
रूपकोदाहरणेष्वपि क्रमेणानुभयन्यूनाधिकभावाउन्नेयाः अनेनैव क्रमेणोदाहरणान्तराणि चंद्रज्योत्स्ना
विशदपुलिनैसैकतोऽस्मिन्सरय्वाः वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् एको वक्ति प्रथमनिहितं कैटभं
त कंसमन्यस्त्वं मत्त्वकं प्रथम भवता को हतस्तत्र पूर्वम् अत्रासत्वमित्पनेन कंसकैटभयोर्हन्ता योगरुडध्वजः
तत्तादात्म्यं वर्णनीयस्य राज्ञः प्रतिपाद्यते प्रतिकंसकैटभयोर्वधयोर्वा पर्याप्तसंख्यानेन तत्तादात्म्य व्या

कु० नं० ५
5

जेन दृढीकरणात् पूर्वावस्थातत उत्कर्षापकर्षयोरविभावनात्त्वात् अभयाभेदरूपकम् यथा द्विधाप्यमंथचक्रे कौन्तान्मुकुन्द
केषुच तान्मुक्ते ष्वप्यनाशक्तः सास्ताङ्गोनिनाकृतिः अत्र सा तादिति विशेषणेन विरक्तस्य प्रसिद्धशिवनाराम्यमुद्रि १२
रूपनाकृतिरिति दिव्यमूर्तिविकल्पप्रतिपादनान्न्यूनाभेदरूपकम् त्वय्यागते किमिति वेपत एष सिन्धुस्त्वं सेतुमंथ से
कृदतः किमसौ बिभेति द्वीपान्तरेपि न हि ते त्पवशं वदोषस्त्वं राजपुंगव निजेव तरेण लक्ष्मीः अत्र त्वं सेतुमंथकृ
दिति सेतोरमन्तमंथनस्य कर्त्तृपुरुषोत्तमेन वर्णनीयस्य तादात्म्यमुक्ता तथापि त्वदागमनं सेतुबंधनाय
मंथनाय चेति समुद्रेण न भेतव्यम् द्वीपान्तरगमनापि त्वत्तवशंवदत्वेन पूर्ववत्तद्वीपान्तरे जेतव्याभावात् प्राप्तत
क्ष्मीकत्वेन मंथनप्रयासाभावाच्चेति पूर्वावस्थातत उत्कर्षविभावनादधिकाभेदरूपकम् किंपद्मस्य रुचिं न हं
ति नयनानंदं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् वक्त्रेंदौ तव सत्ययं यदपरः शीतांशु
रभ्युज्जृंभते दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिंबाधरे अत्रापरः शीतांशुरित्यनेन वक्त्रेंदोः प्रसिद्धचंद्रात्भेदमा
विष्कृत्य प्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनोत्कर्षापकर्षयोरदर्शनादनुभयताद्रूप्यरूपकम्

राम
५

अथ चतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोचनः शंभुः भगवान्बादरायणः अत्र ब्रह्मादावपरत्वविशेषणोक्ति
धपि ताद्रूप्यमात्रविवक्षाविभाविता चतुर्वदनत्वादिनैकत्वं चोक्तमिति तन्मूलं ताद्रूप्यरूपकम् इदं विशेषोक्तेरुदाह
रणमिति वामनमतम् यदाह एकगुणहानौ गुणसाम्यदार्ढ्यं विशेषोक्तिरिति किमशुभिम्लेवितेजं उमन्यसे म
यि निमज्जतु भीमसुतामतः मम किल श्रुतिमाह तदर्थिकं नलमनुविंदु पदं विबुधः स्मरः अत्र दमयंतीकृतचंद्रोपा
लंभे प्रसिद्धचंद्रेन निष्पत्यकमातिक्रमनः प्रवेशप्रतिपत्ति तात्पर्यविषयः किंतु नलमनुवन्ध्य एवेति तत्त्वाधिक
प्रतिपादनापिकताद्रूप्यरूपकम् रूपकस्य सावयवत्वनिरवयवत्वादिभेदप्रपंचनं तु चिंतामीमांसायां द्रष्टव्यम्
परिणामः क्रियार्थश्चेद्विषयी विषयात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा २१ यत्रारोप्यमाणो विषयी
कथ्यमानः किंचित्कार्योपयोगित्वेन निबध्यमानः स्वतत्त्वस्य तदुपयोगित्वासंभवात् प्रकृतात्मतापत्तिमपेक्षते तत्र परि
णामालंकारः तत्रोदाहरणं प्रसन्नेनेति अत्राब्जस्य वीक्षणोपयोगित्वं निबद्धं न तु घ्राः स्मरजीवितकादिसमास
नो नरपदार्थप्राधान्यात् न्यासोपमितसमासाश्रयणेन दृगब्जमिवेति पूर्वपदार्थप्राधान्यमस्तीति वाच्यम् प्रसन्ने
छ

कु० नं० नेति सामान्यधर्मप्रयोगादुपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति तत्प्रयोग एव तु उपमितसमासानुशासनात् अत्र तु स्थायी
६ त्वेनोपयोगित्वं न स्वात्मनारंभकत्वं तत्तस्य प्रकृतत्वात्मकता परिणामप्रयोजनत्वादिति मालंकारः यथाग्नौ तीर्त्वा भू
6 तेषां मोऽतिथिजन्मनां रेणुनी मात्मनाऽसौ त्वत्तो यमनात्मने सोऽमि त्रिमेत्री मपधुप्रकृतवाना तन्वो विकाय स्याम ग्रासमननीभिः
शावरूपवतिभिः कोऽनु कौरंच दंसं कृष्णादन्वीयमानः सत्तामचलमयो चित्रकूटं प्रपत्स्ये ग्रामाणां प्रमाणं सोऽमि मन्मनः
त्रिमेत्री हृपतापत्याग्रहोपकारकलक्षणे कार्ये पयोगी तस्यात्मना गृहस्थरूपं नाथैक प्रसादापेक्षत्वेन नेत 1
नार्थित्वाभावादिति परिणामः बहुभिर्बहुधा लोकैर्दैकस्योऽन्वेव रथ्येति स्त्रीभिः कामोऽर्थिभिः त्वद्धुः कालः
शास्त्राभिरेति सः ॥ २२ ॥ यत्र नानाविधधर्मयोग्यकं वस्तु तत्तद्धर्मयोगरूपनिमित्तभेदादनेकेन ग्रहीत्रा नेकधो
ल्लिख्यते तत्रोल्लेखः अनेकधोल्लेखने हृत्य र्थित्वं भयादिकं यथार्हं प्रयोजकं रुचिरभिरतिः अर्थित्वं लिप्सा भयं भी
तिः स्त्रीभिरित्याद्युदाहरणम् अत्र एक एव राजा ह्येऽदर्थवित्त्वेन यथाक्रमं बालो तिस्त्रीभिरर्थिभिः प्रस्थितिभिश्च हृत्य
र्थित्वभयैः कामसंकल्पनहः कालरूपो दृष्टः यथा वा गजत्रातेति तत्स्वामिः श्रीकांत इतियोवते यथा स्थित श्व वा। राम
६

गजं लाभि ईदृशः शोभितः स कौतुकम् यस्त्वयाभीतं मकं जं गं त्वरयात्रा पतेस्म सो यमादिपुरुषोत्तम इति वस्त्राभिः संसाभीत्यात्त दृष्टा
र्थिनीभिः कामोयंमयुत्तांप्रविशत् दृष्टः यस्त्वयाचं चलत्वेन प्रसिद्धयाः श्रियोपिकामोपचार वैदग्ध्येन नित्येव लभः सो
यं दिव्य युवेति युवतीसमूहैः सोत्कं दृष्टः बालाभिस्तु वात्सल्यगत रूपवेषेणालंकार दर्शनमात्रलालसाभिर्यथावास्थित
वेषाभिः पुत्रको दृष्ट इति बहुधोल्लेखः पूर्वं कामत्वाद्यारोपो रूपकसंकीर्णः अयं तु शुद्ध इति भेदः एकेनव बहुधोल्लेखे त्वेष्व
सो विषयभेदतः गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने २३ गृहीतृभेदाभावेपि विषयभेदाद् बहुधोल्लेखे नायमुल्ले
खः उदाहरणं श्लेषसंकीर्णं वचोविषये महान्यदुरित्यादिव तत्र हस्यातिरित्यादि अर्थं तावत्यापि क्रोडीकरणात् प्रदे
यथा अकृशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितम्बे अधरेप्यरुणं मम चित्ते करुणा शूलिकपालिभाग
धेयम् स्यात्स्मृतिभ्रान्तिसंदेहैस्तदंकालंकृतित्रयं पंकजं पश्यतः कान्तामुखं मे गाहते मनः २४ अयं प्रमत्त मधुपत्व
मुखं वेति पंकजत्वम् पंकजं वा मुधांशुर्वेत्यस्मात्कं तत्तु निर्णयः २५ स्मृतिभ्रान्तिसंदेहैः सादृश्याद्धेतुभूतैः स्मृतिभ्रा
न्तिमान् ससंदेहश्चेति स्मृत्यादिपदांकितमलंकारत्रयं भवति तत्र क्रमेणोदाहृतम् यथार्वा रिम्यात्मपि कृतवि

स्मरति

न्निवध

वर्णमाने:

कु० नं० स्मयांपुरस्तादेभस्त्तरः स्मरदरविंदरचारुहस्तं उद्वीक्ष्य प्रियया मिव कोपि तस्तारं ती मस्मार्षं जलजलनिधिमंथनस्य शौरिः पूर्वत्र सम
७ तिमदृशाहार्ते सदृशास्येव स्मृतिः अत्र सदृशालक्ष्मी स्मृतिपूर्वकं तत्संबंधिनो जलनिधिमंथनस्याभि स्मृतिरिति भेदः ।१
म पलाशकुसुमभ्रांत्या शुकतुंडे पतत्यलिः सोपि जंबूफलभ्रांत्या तमलिं धर्तुमिच्छति अत्रान्योन्यविषयभ्रांतिनिबंधनं
7 पूर्वस्माद्विशेषः जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः किं कनिष्ठाः किमु ज्येष्ठा घटीयंत्रस्य दुर्जनाः पूर्वोदाहृत
संदेहः प्रसिद्धकोटिकः अयं त्वप्रसिद्धकोटिक इति भेदः शुद्धापह्नुतिरन्यारोपार्थो धर्मनिह्नवः नायं सुधांशुः स्य
किं तर्हि व्योमगंगासरोरुहम् २६ वर्णनीये वस्तुनि तत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः कविमतिवि
कारोत्प्रेक्षितधर्मान्तरस्यापि वा निह्नवः शुद्धापह्नुतिर्यथा चंद्रे पुनरीपुंडरीकत्वारोपफलकस्तदीयधर्मस्य चं
द्रत्वस्यापह्नवः यथा वा अंके केपि शशंकिरे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे
इंदौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते तत्सांद्रं निशि पीतमंधतमसं कुक्षिस्थमालक्ष्महे अत्रोत्प्रेक्षितधर्म
प्यतामपह्नवः परपक्षत्वोपन्यासादर्थसिद्धः स एव युक्तिपूर्वकश्चेद्धेत्वपह्नुतिः नेंदुस्तीव्रो न निश्यर्कः सिंधोरौ
र्वोयमुत्थितः २७ अत्र चंद्र एव तीव्रत्वनैशत्वयुक्तिभ्यां चंद्रत्वसूर्यत्वाभ्यनुह्नवो वडवानलत्वारोपार्थः यथा वा ॥ राम
ले ७

च

तो संधानभूमिषु रमणीनां शिलासंघट्टेषु संघट्टनजन्मानः किरणाः स्फुरन्ती चन्द्रमध्ये च्छायामयाः शशाङ्कस्येति यावत्तो क्लिश्येषां कथं वि(
दपित्तनन हि प्रसक्तिः अत्र चंद्रमध्ये संघट्टनकालिकमन्दरशिलासंघट्टनव्रणकिणस्यैव च्छायापाततो नां संभवोनास्तीति
न्य च्छायात्वापह्नवः पामरवैनोपन्यासेनाशिक्षत : अत्र तस्यारोपार्थः पर्यस्तापह्नुतिभेदः नायं सुधांशुः किं तर्हि(
सुधांशुः प्रेयसीमुखम् यत्र कचिद्वस्तुनि तदीयधर्मनिह्नवः अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्यारोपार्थः सापर्य
स्तापह्नुतिः यथा चंद्रे चंद्रत्वनिषेधः वर्णनीये वस्तुनि प्रेयसीमुखे तदारोपार्थः यथा वा हालाहलं नैव विषं विषमा
जेना. परं ब्रह्मणः मत्र मन्वते निपीय जागर्ति हि तल्लोकनं तं पिबन्ः स्वपत्यनिशं मन्नुष्यति निद्रया हतः पूर्वोदाहरणे हेतुः किं ना
स्त्यत्र तु स्यादिति भेदः ततश्च पूर्वापह्नुतिवदत्रापि हेतु विप्रधंस्यात्यनिति अतो नापह्नुतिरेवास्य यं कायको भ्रांति वा र
ति तापं करोतीति सोत्कंपं ज्वरः किं सखि न स्मरः अत्र तापं करोतीति समानेतां ते कापि नैतस्य ज्वरसाधारण्याद्बुद्ध्या
सख्या ज्वरः किमिति पृष्टेन सखि स्मरः इति तत्त्वोक्त्या भ्रांतिवारणं कृतं यथा वा नागरिकस्य मधिकोल्लाति रिहन हि वः
कोपघ्नभयतः प्रश्नः नहि नहि कान्तिकलसौधं शुभ्रं दंशोपमस्यनत्तु पुच्छः इदं संभवति भ्रांतिपूर्विकायां भ्रांतापह्नु
तावुदाहरणम् कान्त्येतभ्रांतिपूर्विका यथा जरानेयं बेली कृतकच कत्तापो नागालेगलेकल्ल एवं शिरसि पारिरेखा
२

हमा२

कु०नं०
८
8

नकुसुमम इदं भूतिर्नेगो प्रियविरहजन्मा धवलिमा गुणानिमोत्या कुसुमशर किं मां प्रहरसि अत्रकान्त्यितमां
त्तिर्जनितेयमित्यादि निषेधमात्रेणोल्लेखपूर्वकत्वप्रसङ्गाभावात् इतीत्वन्ततत्वाख्यानोपमेत्युपमाभेदं मेने यदाह न
पद्मं मुखमेवेदं नभं गो च चञ्चरीक इमे इति विस्पष्टसादृश्यापन्नतत्वाख्यानोपमानतेति ।' छेकापह्नुतिरन्यस्य शङ्कातः ।
तथ्यनिह्नवे प्रजल्पन्मत्य देलनाः कान्तः किं न हि नूपुराः कस्याश्चित्कञ्चित्प्रति रहस्योक्तावक्त्रेन श्रुता यामुके ।
सारस्वर्णात्तरवणीनेन तस्य निह्नवे छेकापह्नुतिः यथा नापिक पान्नेमे सखीं प्रति जल्पन्मत्यदेलागत इति स्वना
यकवतां नेवे पमानेतदाकल्पे कान्तः किमिति शंकितवती सन्यां प्रति न हि नूपुरा इति निह्नवः यथा वा सीत्कारं शि
क्षयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किं मिलितो न हि न हि सखि हैमनः पवनः इदमर्थयोजनया तथ्य
निह्नवे उदाहरणम् शब्दयोजनया यथा पश्येत्कल्पनेस्मरानि सततं भावे भवत्कुन्तले नीलेनुष्यति किं करोमि महि
तेः क्रीतोस्मि तेविभ्रमैः इत्युत्तवमवचो निशम्य सहसा निर्भर्त्सितो राधया कुष्मरस्तत्यमेवतच्छपरिजानन्क्रीडावि
टः पातुवः सर्वमिदं विषमं तत्र योजने उदाहरणम् विषयैकेपि अवस्थाभेदेन योजने यथा वदंतीजारवृत्तां

राम
८

तं वत्सौधमर्त्र्यां सावी धिया पतिं वृष्णस खितत: प्रवृत्तास्मीति शुरुषपत" कैतवापन्हुतिर्यत्रो व्याजाद्यैर्निन्हुते पदैः तिर्यति व्याजादेः पदैर्नि
।स्मरना राचा: कांता दकृपात केतवात ३१ अत्र सत्यत्वाभिधा पिता कैतव पदेन नेमे कांताकटास्त: किंवुस्मरना गचा: न्हुते: यत्रो
इत्यपन्हव: प्रतीयते यथा वा ती केपुवाति कथया विधिनोदरेषु मध्या न्हजंभित महातय ता पतत्ता: स्कंधात ऐ त्थितद्वा सत्यो कैतवा
ति शिखा वक्त्रेन निकांप्र सार्य्य तरवो जल मर्थ्यंते संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना उक्तानुक्तास्पदा पन्हुतिः
अत्र दृष्टि प्रतिरोध कत्वं निमित्तम् ५ भूमि यात्रतिधा तिकास्पदेपो ३२ धूमलोमं तम: शंके कोकीविरहशुष्मणा तिपंती वनमोगानि वर्षतीवाजनं नभ: ३३
रक्तं तवांघ्रियुगत्तं विासेप लाङ्कुवं त्वन्मुखाभेच्छयान्नूनं पर्मेर्वैराय ते शशी ३४ मध्य: किंकुचयोर्मध्येवद्ध: कनक
व दामभि: प्रायोजैत्वत्पदे नेमे संप्रायुक्तो येन पस्याति ३५ अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यता दात्म्य संभावनमुत्प्रे
क्षा सा च वस्तु हेतु फलात्मगोचरत्वेन त्रिविधा अत्र वस्तुन: कस्यचित्स्वत्वं तत्तादात्म्यं संभावना प्रयोस्य रूपोत्प्रेक्षा र
रुच्यते अहेतोर्हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा हेतृत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते अत्राद्या स्वरूपोत्प्रेक्षा उक्तविष मा ५
यानुक्तविषया चेति द्विधा परे हेतुफलोत्प्रेक्षे सिद्धविषयाचेति प्रत्येकं द्विविधे एवं बस्तामु त्प्रेक्षालं धूमलोमेत्या
दिना क्रमेणोदाहरणानि रजनीमुखे सर्वत्र विसत्वरस्य तमसो नेलस्य दृष्टि प्रतिरोधकत्वादि धर्मसंबंधेनाम्मसानेनति
सिद्धविषयात्

कु० सं०
२
9

मित्तेन सद्यः प्रियविघटितसर्वदेशाश्रितकोकांगनाहृदुपगतप्रज्वलितध्यहृदित्ताललधूमस्तोमतादात्म्यसंभावनास्वरूपो
त्प्रेक्षा तमसो विषयस्योपादानात् उक्तविषया तमोव्यापनस्य नभःप्रभृतिभूपर्यंतस्य सकलवस्तुसाङ्मलिनीकरणेन
निमित्तेन तमःकर्तृकत्वेपन तादात्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षतात्तादात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रे।
क्षा उभयत्रापि विषयभूतस्य तमोव्यापनस्यानुपादानादनुक्तविषया नन्वत्र तमसो व्यापनेन निमित्तेनाञ्जनवर्ष
कर्तृतादात्म्योत्प्रेक्षा चेति दुत्प्रेक्षाद्वयमुक्तविषयमेवास्तु मैवं लिंपति वर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि भाव
प्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रियाया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षणीयतयान्वया
न्वयासंभवात् अत एव हेतोस्तस्योपमायामुपमानतयान्वयोऽदंडिना निराकृतः कर्तायमुपमानं स्यान्न्यग्भूतो
सौ क्रियापदे स्वक्रियासाधनेव्यग्रो नालमन्यदपेक्षितुमिति केचित्तु तमोनभसो विषययोस्तत्कर्तृकत्वेपनव
र्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः तन्मते स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा चेत्येवं द्विविधं स्वरूपं चारणयोः स्व
तः सिद्धेः किमितो वस्तुतो विक्षेपणं न हेतुरिति स्मरहेतोस्तस्य हेतुत्वेन संभावनाहेतूत्प्रेक्षा विक्षेपणस्य विषयस्य
११ सत्त्वात्सिद्धविषया चेदुर्विनीतेत्याभाविकेनाधिकावदनकांतिप्रयाणहेतुरिति तत्र तद्धेतुसंभावनाहेतूत्प्रेक्षा वस्तुत त्व
स्तिरिक्ताया अभावादसिद्धविषया ॥ मध्यः स्वयमेव कुचौ धराति ननु कनकदाम व दृत्वेनाध्यवसिता या वलि

राम
८

पश्चाल्लिप्ता यावल्लाटि इति मध्यकर्तृक कुचपतनोत्पत्तिफलत्वेनोत्प्रेक्षा सिद्धविषया फलोत्प्रेक्षा जलसंपन्नत्वेनेति ज
जावाक्षिते हि दजासन्नतपल्लवे नाभ्यवलिप्ता यः कामिनीनां च रागप्रापुष्पप्राप्तिर्न फलमिति तस्या गगनकुसुमाय
माना या सा प्रः फलत्वेनोत्प्रेक्षणमसिद्धविषया फलोत्प्रेक्षा अनेन क्रमेण लोवोदाहरणं तथालि वालेंदुवक्राण्यपवि
नि कासभावाद्धभुः पलाशान्यतिलोहितानि सद्यो वसंतेन समागतानां नखक्षतानीव वनस्थलीनाम् अत्र पलाशमुकु
लानां वक्रत्वलोहित्यसंबंधेन निमित्तेन वसंतनायकसमागतवनस्थलीसंबंधित्वेन नखक्षतत्वतादात्म्य
संभावना उक्तविषया स्वरूपोत्प्रेक्षा पूर्वोदाहरणे निमित्तभूतधर्मसंबंधो गम्य इह तूपात्त इति भेदः कृतः नाभि नीलत्वे हि
वक्षावक्षस्य सादृश्यपात्त्वेन प्रसिद्धतरत्वादुपमैवास्तु तिपत्तीत्युदाहरणे लेपकेनोपमानत्वादि स्वक्रियोपसर्जन प्रतिरोध कान्य
त्वादिह नखक्षततानामन्योपसर्जनत्वस्योपमावाधकस्याभावात् उच्यते उपमा यत्र क्वचित्स्थितैः पिनखक्ष
तैः सह वक्तुं शक्यते या वसंतनायकसमागतवनस्थलीसंबंधित्वस्य विशेषणस्यानपेक्षितत्वादिह तदुपादानम्
पलाशमुकुलानां नखक्षततादात्म्यसंभावनायामिवशब्दः स च स्थापयतीति तथात्व एव तद्विशेषणस्य फलत्वात
आतिच संभावनायामपीवशब्दो दृष्ट इति छन्देवत्तरवभातीति पित्तस्थीवत्तरंगावल्ये: समुद्र: केन चेदं तदा तद पक
रेंदितिपंतीव दिगंगना: अन्नत्तरंगावल्ये: केन चंद्रनस्य प्रेरणं पेषणं तत यो त्रेसते इति समुद्रादुत्थितस्य चंद्रस्य

कु० नं०
१०
10

प्रथमसमुद्रपूरे प्रसृतानां करणानां क्षितिव्यापनं च समुद्रोपान्तफेनचंदनकृततल्लेपनत्वेनोत्प्रेक्षिते उभयत्र क्रमेण स
मुद्रप्रान्तगतफेनचंदनपुंजीभवनं दिशां धवलीकरणं च निमित्तमिति फेनचंदनस्येरणा किरणव्यापनयोर्विषययोरनु
पादानात् अनुक्तविषया स्वरूपोत्प्रेक्षा । येषां तूपात्तयोः समुद्रचंद्रयोरेव तत्कर्तृकपेषणालेपनरूपधर्मोत्प्रेक्षा । तेषां ति
मतं तेषां मते पूर्वोदाहृतत्वे धर्मोत्प्रेक्षेव तदात्म्योत्प्रेक्षा स्वरूपधर्मोत्प्रेक्षयोः संकीर्णत्वे ते निर्भेदो वाच्यः । रात्रौ
रवेर्दिवा चंद्रस्याभावादिव सम्भ्रमः । भूमौ प्रवृत्तापयपश्यासीसषवान्सनत्वोदिते रात्रौ रवेर्दिवा चंद्रस्याभावः सन्नपि स
नाथयप्रा : मौनिहेतुरिति तस्य तद्धेतुत्वसंभावना सिद्धविषयाहेतूत्प्रेक्षा विवस्वतानां पिषतेव मिश्राप्सुको नीतारवेस्सर्पः
सहकिलालसमंजनानां गावो पिनेत्रापलोमसर्पेणालेनेदमानन्दं विधुनंधकारैः अत्र विकस्वता कृतं स्वकिरणैः ।
सहजनलोचनानां नयनमसहेवरात्रबान्ध्यं प्रतिहेतुत्वेनोत्प्रेक्षिते इति असिद्धविषयाहेतूत्प्रेक्षा पूर्णं विधुर्वर्ध
पितुं पयोधेः शंकेऽयमेणांकमणिं किमेति यथां शिरांगिप्रियविप्रयोगे सशोककोकी नयने कियंति अत्र चं
द्रेण कृतं समुद्रस्य वृंहणं सरवनदानेन कृतस्य चंद्रकान्तद्रावणस्य कोकांगनानाख्यस्राबाणस्य च फलत्वेनोत्प्रे गम.
क्षिते इति सिद्धविषया फलोत्प्रेक्षा रथ्यास्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् उत्पत्तिभूमौ तुरगो १.
जमानांरश्मि प्रतस्थे रविहृतास्यः । अत्रोत्तराणां स्वपरिवर्तनमसदेव फलत्वेनोत्प्रेक्षिते इत्यसिद्धवि

म१

यथा पल्लो त्येसा एतास्वोत्प्रेक्षा: मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभि: उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि ता
दृशः : ३५ इत्युत्प्रेक्षाव्यंजकत्वेन परिगणितानां शब्दानामप्रयोगे गम्योत्प्रेक्षा यथा कीर्तिर्भ्रमणश्रान्ता विवेश
स्वर्गनिम्नगाम रूपकातिशयोक्तिः स्यात् निगीर्याध्यवसानतः पद्मपनीलोत्पलद्वन्द्वान्निःसरंति शिताः
शराः ३७ विषयस्य स्वशब्देनोल्लेखनम विनापि विषयिवाचकेनैव शब्देन ग्रहणं विषयनिगरणं तत्पूर्व
कं विषयस्य विषयिरूपकत्तया अध्यवसानमाहार्यनिश्चयस्तस्मिन्सति रूपकातिशयोक्तिः यथा नीलोत्प
लशरशब्दाभ्यां लोचनयोः कटाक्षाणां च ग्रहणं निगरणपूर्वकं तद्रूपताध्यवसाने यथा वा वापी कापि
स्फुरति गगने तत्परं सूक्ष्मपद्या सोपानालीमधिगतवती कांचनीमैन्द्रनीली अग्रे शैलौ सुकृतिसुगमौ चंद
नाच्छन्नदेशौ तद्रूत्यानां सुलभममृतं संविधानात्सुधांशोः अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः
अत्रातिशयोक्तौ रूपकविशेषाणां रूपके दर्शितानां विधानामिहातिसंभवोऽस्तीत्यतिदेशेन प्रदर्शनायेति
ना साध्यभेदातिशयोक्तिरिति द्विविधं तत्राप्याधिक्यन्यूनतादिविभागश्चेति सर्वमत्र सेयोपन्न यथा वा

कु० नं०
११

समावस्यासेहपवनचकोरैरखुसत्तः किरनज्यो त्स्नामच्छां नवलवलि पाकप्राणयिनीम उपप्राकारागं
प्रहिणुन यनेतर्कयमनागमाकाशे को यं गलति तहरिणः शीतकिरणः अत्रको यं गलितहरिणइत्युक्त्या
प्रसिद्धचंद्राद्भेदः ततउत्कर्षध्वगर्भितः एवमन्यत्राप्यूहनीयम यथपन्हुतिगर्भत्वं सैवसापन्हवामता
त्वत्सूक्तिषु मधुधाराजनमांताः पद्यंतितांविधौ अत्रत्वत्सूक्तिमाधुर्यमेवामतमित्य तिशयोक्तिः चं
द्रमंडलस्यममतंनभवतीत्यपन्हुतिगर्भा यथावा मुक्ताविद्रुममेतराममधुरसः पुष्पंपांशूर्वहं प्रालेयघु
तिमंडलेखलुतयोरेकाहिकानार्लवे तद्योदंचतिशंबेमहर्धुं नतपुनः पूर्वोचलाभ्यंतेरेतानीमा
निविकल्यंयंतितदमेयेषां नसादृक्पद्येः अत्राधरस्य एवमधुरइत्यतिशयोक्तिं पुष्पंरसोनमधुरस(सं ४
इत्यपन्हुतिगर्भा अतंकारसर्वस्वकृता खल्पोत्प्रेक्षापां सापन्हवत्वमुक्तम गत्वामुतीरंतीमि घट्टनेन
ससंभ्रमं पौरविलासिनीषु यन्मोल्लसत्फेननततिच्छलेन मुक्ताट्टहासेवविभातिसिप्रा इतितत्ताच्छिया राम
नतभेदः यत्रतयत्र्यसापन्हुतिगर्भत्वप्रकं यत्रफेननततित्वमपन्हुतं तत्रैवाट्टहासोत्प्रेक्षणादिहनुपपर्प्प ११

स्ता पकृतिगर्भत्विम हेतुमंगुलादाव पकृतस्या मतादे: सत्याद्विवनिवेशगूते इदं च पर्य्यस्ता पकृति गर्भत्वक
त्वेस्ता या मपि संभवति तत्र स्वरूपो त्प्रेक्षा पं यथा जानेति रागादि दमेव विंवे विंवस्य च मुखेकमि तोष
स्त्वं तपो विंध्रो वा वाम ना स्वमानं नो निश्चमते भूद नयोजनेनानाम अत्र प्रसिद्ध फले विंवतामपकृत्या
तिरागेलानिमित्तेन दमपंत्यधरे तद्रूपो त्प्रेक्षा च पर्य्यस्ता पकृति गर्भा हेतूत्प्रेक्षा यां गर्भत्वंप्राकृति वि तत
ते हेतूत्प्रेक्षो दाहरणं एव दृश्यते यथांधकारे व्यांधहेतुत्वं अपकृत्यान्यत्र निवेशितम फलो त्प्रेक्षा
यां यथा रवि तप्तो गजः पद्मान् तद्गृह्णात्यापि नं ध्रुवं स ... तो विशति नलान्तं गजस्ता नं हिति ष्फ
ज लान अत्रास्य सरः प्रवेशं प्रति कृते स्ता ने फलत्वमपकृत्य पद्मवापने तल्लिवेशितम अनम
नयाप्रशस्ता तु प्रसता प्रकृतमनुसरणः भेदका तिशयोक्तिः स्यात्तस्यैवान्यत्व वर्णनम अन्यदे
वास्य गांभीर्य्यमन्यद्धैर्य्यं महीपते: १९ अत्र लोकप्रसिद्धां गांभीर्य्यादेरपि भेदो वर्णितः यथा वा अ
न्यथं रूपसंपत्तिरन्या वेदग्धधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः संबंधातिशयोक्तिः स्या
स्यादयोगे योगकल्पनं सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमंडलम यथा वा कतिपयदिवसैः

कु० नं०
२२
12

त्वयं प्रयायात्कनकगिरिः कृतवासरावसानः इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे
अत्र चक्रवाकाः सूर्य्यास्तमयकारकमहामेरुत्वसंभावनाप्रयुक्तसंतोषासंबंधेपि तत्संबंधो वर्णितः
योगेप्ययोगोऽसंबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे ४१ अत्र स्वर्द्रुमेष्वा
दरसंबंधेपि तदसंबंधो वर्णितः यथा वा अनयोरनवद्यांगि स्तनयोर्जृंभमाणयोः अवकाशो न पर्याप्तः न
तव बाहुलतांतरे अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगंति समं देव ज्यां शराश्च पराश्च
ते ४२ अत्र यदा मौर्व्यां शरसंधानं तदानीमेव शत्रवः क्षितौ पतंतीति हेतुकार्ययोः सहत्वं वर्णितं यथा
वा मुंचति मुंचति कोशं भजति च भजति प्रकंपमरिवर्गः हंमीरवीरखड्गे त्यजति त्यजति क्षमामाशु अत्र च
खड्गस्य कोशत्यागादिसमकालमेव रिपूणां धनगृहत्यागादि वर्णितः चपलातिशयोक्तिः स्यात्कार्ये हेतुप्र
सक्तिजे यस्यामीत्युदिते तन्व्या वलयोऽभवदूर्मिका अत्र नायकप्रवासप्रसक्तिमात्रेण योषितोऽतिकार्श्यं राम
२२

कार्यमुखेनैव प्रदर्शितम् यथा वा आदाय हंसरुचीति तेपि कुलमेहस्ताग्रमालोहिमंल्लाहारं जनवार्तयापिस
हसारक्तं तलं पादयोः अंगनानामनुलेपनस्मरणमप्यत्वं तद्वेदाहं हं तांधीरदृशः किमन्यदलकामोदो विभा
व्यते यथा वा यामिनयामीति धवे वदति पुरस्तात्तत्क्षणेन नितम्बिन्याः गलितानि पुरो वलयान्यपराणि तथै
व दलितानि अत्यंतातिशयोक्तिस्त्वौर्ध्व पर्यव्यतिक्रमे अग्रे मानो गतः पश्चादनुनीता प्रियेण सा यथा
ग वा कवींद्राभासन्नश्यामतरमेवांगतामुत्र वक्ष्यलङ्गा सेवाकुलकरिमदामोदमधुराः अमीपश्चात्तेषामुपरि
पतितारुद्रान्नृपतेः कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः एतां तिस्रोप्यतिशयोक्तयः कार्य्यशेषप्रस्ताप
नार्थाः वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता संकुचंति सरोजानि स्वैरिणीवदनानि च त्वदंगमार्दवे दृ
ष्टे कस्य चित्ते न भासते मालतीशशभृल्लेखा कदलीनां कठोरता प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारू
पैकधर्मान्वयस्तुल्ययोगिता संकुचंतीति प्रस्तुततुल्ययोगिताया उदाहरणम् तत्र प्रस्तुतचंद्रोदयकालीनत
यावर्णनीयानां सरोजानां प्रकाशाभीतस्वैरिणीवदनानां च संकोचरूपैकक्रियान्वयो दर्शितः उत्तरश्लोके

कु॰नं॰
२२
13

नायिकासौ कुमार्य्यवर्णनेप्रस्तुते [smudged] अत्रवर्त्तनीयानां मालत्यादीनां कठोरतारूपैककृयान्वयः यथावा
संजातपत्रप्रकाराण्वितानि समुद्वहंति स्फुटपाटलत्वं विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वः ।
द्वितीयः नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परिणाहिरूपं जातास्तदू
र्वोरुपमानबाह्याः अत्राप्यौपम्यवर्णने तदीयत्वेन प्रस्तुतानां दिनानां पद्मानां चैककृयान्वयः ऊरुवर्णने
प्रस्तुतानां करिकराणां कदलीनां चैककृयान्वयः हिताहिते तौल्यवृत्तिं यथा तुल्ययोगिता प्रदीयते पराभू वी
तिर्मित्रशात्रवयोस्त्वया अत्र हिताहितयोः मित्रशात्रवयोरुत्कृष्टभूतिदानस्य पराभवदानस्य च श्लेषेणा ९
भेदाध्यवसायात्तद्वृत्तितौल्यं यथावा यश्च निंबं परशुना यश्चैनं मधुसर्पिषा यश्चैनं गंधमाल्याद्यैः सर्वस्य क
टुरेवसः अत्र वृश्चति सिंचति अर्चतीत्यध्याहारैर्वाक्यानि पूरणीयानि पूर्वोदाहरणं स्तुतिपर्य्यवसायि इदंतु
निंदापर्य्यवसायीति भेदः ३ यं च सरस्वतीकंठाभरणोक्तास्तुल्ययोगिता गुणोत्कृष्टैः समीकृत्य वचोन्यो तुल्ययो राम।
गिता लोकपालो यमः पाशी श्रीदः शक्रो भवानपि अत्र वर्ण्णनीयो राजा शक्रादिभिर्लोकपालत्वेन समीक
२३

तः यथा वा संतानानि मया ह्रीलंते तडिद्विलसितान्यपि स्तम्भयेनंति छेति यत्नार्थान्यतिस्वयम् पूर्वसिनिति इ
तिदा इयं काव्यादर्शे दर्शिता इमां नु स्थायो गिनां सिद्धिरीति केचित्प्रबन्धकुः मदाहतपदेषुः सिद्धिः ख्यानेषु येना
म कीर्त्यते तत्यत्नो रूपेषु वामेवेहविरम्यानां त्वं वेत्थ वेदविद्भिः इति मतं तरे वस्य माणं दीपकमेव वदंति वर्ण्या
वर्ण्यानामेकधर्मसंबंधो दीपकं यथा: मदेन भाति कलभः प्रतापेन महीपतिः प्रस्तुताप्रस्तुतानामेकधर्मान्वयो।
दीपकम् यथा कलभ नृपालयोः प्रस्तुताप्रस्तुतयोर्भान क्रियान्वयः यथा वा मतिः शाणोल्लीढः समरविज
यी हेति निशातो मददलीणो नागः शरदि सरितः श्यानपुलिनाः कलाशेषश्चंद्रः सुरतमृदिता बालवनिता
नितनिम्नाशोभंते गलितविभवाश्चार्थिषु नृपाः अत्र प्रस्तुतानां नृपाणां अप्रस्तुतानां मणयादीनां च शोभै
कधर्मान्वयः प्रस्तुते कनिष्ठः समानोधर्मः प्रसंगादन्यत्र उपकरोति भासारार्थमारोपितो दीपोरथ्याया
मि वेति दीपसादृश्याद्दीपकं तेन त्रयं चेति रत्नार्थिकन्यपत्न्याः पश्यति पुष्पं पृथ्वी चिन्हे तिप्रभावात्
यः शून्यम्बकुलवि यश्च यश्च जानाति सेविनं मित्यत्र प्रस्तुताप्रस्तुतानां गुणपदधर्मान्वयः प्रतिभाति मदे

कु० न०
२७
14

नभाति कलभस्त्वत्र प्रस्तुतस्यैव प्रथमं धर्मान्वयः तथापि प्रासंगिकत्वं न हीयते वस्तुगत्या प्रस्तुतो दृशोनप्रव
नस्यैव वर्णेन स्याप्रस्तुतेप्यन्वयात् न हि दीपस्य प्रासादस्थस्य पोर्श्वगघटदुपकारकत्वे नजामात्रार्थं प्रपितस्य
रूपस्य श्रुतिविम्बः प्रथमं पतितेव रणेन च प्रासंगिकत्वं न हीयते तुल्ययोगितायां तु एकं प्रस्तुतमन्यदप्रस्तुत
मिति विशेषाग्रहणात्सर्वो दृशोनेव धर्मो क्रियेति विशेषः अयं चानयोरपरो विशेषः उभयोरनयो रूपमाले
कारस्य गम्यत्वाविशेषेपि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थितउपमानोपमेयभावाल
त्रनु विशेषाग्रहादेकाधिकः सदृति त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् वर्षत्यंबुदमालेयं वर्षत्येषा
विकसंति ८ च शर्वरी। उन्मीलंति कदंबानि स्फुटंति कुटजोद्गमाः माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः दी
पकस्यानेकोपकारार्थत्वमतया दीपस्यानीयशब्दस्यार्थस्य वा उभयोर्वा आवृत्तौ त्रिविधमावृत्तिदीपकं
बा- क्रमेणैव त्रयेणोदाहरणानि यथा उत्कंठयति मेघानां माला वर्गं कलापिनां। यूनां चोत्कंठयत्यद्य मा तम
नसं मकरध्वजः। शमयति जलधरधाराश्चातकयूनां तृषं चिरोपनतां तापयति च वधूलोचनजलभा

विकसंति ८ स शमयति २८

राकामित्रं प्रकाशमहाछिप्र वल्ले ननिर्जितं नव निलीयते चंद्रविंबमंबुधरे अरविंदमपि च सुंदरि नैलीयते पा
थ संपूरे एवं चावनीनां प्रस्तुताप्रस्तुतां प्रस्तुतो भय विषयत्वाभावे दीपकव्याप्य पतिमात्रे(ऽ)तो दीपकमप
देश: वाक्ययोरेकसामान्ये प्रतिवस्तूपमामता तां येन भ्राजते सूर्य: शूरश्चापेन राजते ॥ २ ॥ यत्रोपमानो(
पमेयपरवाक्ययोरेक: सामान्यो धर्म: पृथक् निर्दिश्यते सा प्रतिवस्तूपमा प्रतिवस्तु प्रतिवाक्यार्थमुपमा [illegible]
समानधर्मो यस्यामिति निरुच्यते । यथा चैव भ्राजते राजा तेजस्येक एव धर्म: उपमानोपमेयवाक्ययो: पृ
थगभिन्नपदाभ्यां निर्दिष्ट: यथा वा स्थिरशैली गुणवतां खलबुद्ध्या न बाध्यते रत्नदीपस्य हि शिखा वात्यया
पि न नाश्यते यथा वा नवाम्रमस्येरि निपातपंकजे निवेशिताना कथमन्यदिति स्थिते रविंदमकरंद नि
र्भरे मधुव्रतो नेक्षुरकं हि वीक्षते अत्र यद्यपि उपमेयवाक्ये अनिच्छा उपमानवाक्ये अवीक्षेति धर्मभेद: प्रति न
भाति तथापि वीक्षणमात्रस्य वर्जनीयस्य प्रतिषेधानर्हत्वादिच्छापूर्वकवीक्षणप्रतिषेधो यमनिच्छापर्यव
सित एवेति धर्मैक्यमत्र संक्षेप: अथ दृष्टांत: प्रस्तुतानामप्रस्तुतानां वा प्रतिवस्तूपमानं वैधर्म्ये(ण) विद

प्रस्तुता [illegible] मिति विशेष:
प्रस्तुता १

अथ संघातोविशेष ...ऽत्र तिदीपकं वै धर्म्ये

अत्र ज्योतिष्मती रात्र्यन्वत्योर्बिंबप्रतिबिंबभाव:

कु० नं० १५ 15

प्यते यथा विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् नहि वंध्या विजानाति गुर्वीं प्रसववेदनाम् यदि संति गुणा:
पुंसां विकसंत्येव ते स्वयं नहि कस्तूरिकामोद: शपथेन विभाव्यते चित्र बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृति: त्वमेव
कीर्तिमानाराजन् विधुरेव हि कांतिमान् ५२ यत्रोपमानोपमेययो: भिन्नावेव धर्मौ बिंबप्रतिबिंबभावेन निर्दिष्टौ स
दृष्टांत: त्वमेव कीर्तिमानित्यत्र कीर्तिकांत्योर्बिंबप्रतिबिंबभाव: यथा वा कौमंतया: संति सहस्रशोऽप्यरण्या अत्र
ज्योतिष्मती रात्र्यन्वत्योर्बिंबप्रतिबिंबभाव:

ज्वलतीमाकुरनेनभूमिं नतत्नमतारागृहसंकुला यज्ज्योतिष्मती चंद्रमसैव रात्रि: यथा वा देवीं वाचमुपास सारस्वति मंत्रं
३ ते हि बहव: सारं सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारि: कवि: अब्धिर्लंघित एव वानरभटै: किं पिपासा विषयक
त्वस्यागंभीरतामापातालनिमग्नपीवरतनुर्जानाति मंथाचल: नन्वत्रोपमानोपमेययोर्ज्ञानमेकधर्म ज्ञान सागरापरत
इति वस्तुपमायुक्तामेवम् अचेतनेमंथाचले ज्ञानस्य बाधितत्वेन तत्र आज्ञाना नीत्पनेन सागराधस्त लावपि संस्पर्शयो बिंबप्रतिबिंबप्रतिबिंबभाव:
लावधिपर्यंतसंस्पर्शमात्रस्य विवक्षितत्वाद् नोदाहृतोपरावलनिदीपकाद्विशेष: पूर्ववत्प्रस्तुताप्रस्तुत
विषयत्वकृतो द्रष्टव्य: वैधर्म्येणाप्ययं दृश्यते कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहिताश्च नो

राम १५

अत्रापि रतिप्रतिबद्धत्त्पमयोरिव

छिवः तमांसि तिष्ठंति हित्वा वंश्यमानुयावदामा तु दमाऽडिमौ नितान्तम् वाक्यार्थयोः सदृशयोरैक्यारोपो
निदर्शना यद्वत् सौम्यतासे यं पूर्णेन्दोः कलंकिता ५४ अत्रदातृप्रकृष्टसौम्यत्वस्योपमेयवाक्यार्थस्य
पूर्णेन्दोः कलंकित्वस्य उपमानवाक्यार्थस्य यत्नद्यामैक्यारोपः यथा वा अरण्यरुदितं कृतं शवश
रीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् श्वपुच्छमवनामितं बधिरकर्णजापः कृतो(
धृतोंधमुखदर्पणो यदबुधो जनः सेवितः अत्राबुधजनसेवायां अरण्यरोदनादीनां च यत्नद्यामैसा
रोपः पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनां त्वल्लोचनद्वयमलं धत्ते लीलां नीलांबुजन्मनोः अत्रनेत्र
युगले लीलांबुजगतलीलायाः पदार्थारोपो निदर्शना यथा वा वियोगे गौडनारीणां यो गंडतलपांडिमा
अदृश्यत स खर्जूरीमंजरीगर्भरेणुषु [illegible] पूर्वास्मिन्नुदाहरणे उपमेयउपमानधर्मारोपः इह तू
पमाने उपमेयधर्मारोप इति भेदः उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेन तत्समानधर्मा हेपादोपमा
पर्यवसानं तृतीयम् इदं पदार्थवृत्तिनिदर्शनात्मालीनोपमेति जयदेवेन वा हृता यद्यपि वियोगे गौड
लि

तत्र तावत्पूर्वपद्ये भो शिव अस्मदभ्यर्थितानां त्वं विदानीमति इतरं तु ढुंढिमनुसरंतो धूर्जटिमुंडां त्रिजगत् प्रदर्शयंतो वयं कामधेनौ स्थितायां दोग्धुकामाः करभमयोः पश्चात्पयोऽपहारणायोः पार्श्वे दुग्धुं दुःखेनगृ
स्तं करभमनुसृत्य शिर्ज्ञमनुगामन्त्यर्थके सकलकामदमहेश्वरस्थितिकालीनतु दुग्धधेनिकानुसरणकर्तृः कामधेनोः स्थितिकालीन तथाविध करभानुसरणकर्तृश्चैक्यारोपस्तत्रोपमानकोटिविशेष
णयोः कामधेनुकरभयोः उपमेयकोटिविशेषणयोश्च महेश्वरतुंडपतिकयोः यथाक्रमं बिंबप्रतिबिंबभावो बोध्यः ६ बिंबप्रतिबिंबभावापन्नयोः धर्मविशिष्टयोरित्यर्थः

कु॰ने॰ नारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतस्तत्र्यापि विशिष्टयोर्धर्मिणोरैक्या
२६ रोपो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्श
नेति व्यवस्थामाश्रित्यास्माभिरयमिहोदाहृतः एवं च त्वयि सति शिवदातर्यस्मदभ्यर्थितानां
16 मितरमनुसरंतो दर्शयंतो धूर्जटिमुंडां च मेचकलोचनाने दुग्धं हंतो पुष्पकामाः करभमनुसरामः कामधेनौ
२ स्थितायां दोग्धुं मतितीर्थे वाछिन्नुमूर्ध्नि त्वकृपाणतो ऽथम इत्यादिषु वाक्यभेदाभावेऽपि वाक्यार्थवृत्ति
रेव निदर्शना विशिष्टयोरैक्यारोपसद्भावात् द्वयोर्वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन
बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतधर्मिणोर्विवक्षितत्वात् एवं च रा
जसेवामनुष्याणामसिधारावलेहनम् पंचाननपतीच्छंगोऽयालीवदनचुंबनम् इत्यत्र प्रस्तुता
प्रस्तुतवृत्तांतयोरैक्यारोपात्तेऽपि वाक्यार्थवृत्तिनिदर्शनायाः नक्षतिः तयोर्बिंबप्रतिबिंब
भावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति अत एव निदर्शनायां रूपकाद्भेदः रूपके सविशि राम

नृ. वृत्तांतयोः २ २६

द्वयोरेव मुखचंद्रादिकयोरैक्यारोपः अग्निदग्धो हरे हर्षमुत्तरत्ति सो वलति निग्रहे विपिविविधरूपरसस्य नांदंल
ङोमुद्रेस्तुवः इति विशिष्टरूपकोदाहरणेपि न बिंबप्रतिबिंबभावापन्नविशिष्टताविधानात् विष्टरक
मलस्थितिष्टत्वरूपसाधारणधर्मवत्तासंपादनार्थमेव तत्र विशेषणोपादानात् यदा तु सोऽयमुपत्तेत्या
दिनिदर्शनोदाहरणेषु द्रागत्पूर्णेन्द्वादीनामभेदकरत्वादिनेवात्र विशेषणयोर्बिंबप्रतिबिंबभावौ तत्र भाव७
तु विषयविषयिविशेषणानां परस्परसादृश्येन बिंबप्रतिबिंबभावोऽस्ति ज्योत्स्नाभस्मच्छुरणधवला
बिभ्रती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रिकापालिकीयम् द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राक ते
पाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य छलेन इति सावयवरूपकोदाहरणे तत्रापि विषयविषयिणो
स्तद्विशेषणानां च प्रत्येकमेवैक्यारोपः ननु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टका
पालिकीरूपविषयिणश्च विशिष्टरूपेणैक्यारोपोऽस्ति तस्माद्राजसेवा मनुष्याणामित्या[illegible]दावपि
वाक्यार्थवृत्तिनिदर्शनेति प्रक्रमः मतं तन्नोऽत्रेह पदार्थवृत्त्यैव निदर्शनयाभाव्यम् अपरां बोधयंतम्प्रा

फ० ३२

कु० नं० १७ 17

हुः क्रियया सत्सदर्थयोः नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः ५५ उदयन्नेव सविता पद्मेष्वर्प्प
यति श्रियम् विभावयन्समृद्धीनां फलं सुहृदनुग्रहम् कस्यैकिंचित्किंचित्क्रियया विशिष्टस्यस्वक्रि चित्र
यया परान्प्रत्यसतः सतो वार्थस्य बोधयन्निबध्यते तदपरां निदर्शनामाहुः असदर्थबोधने उदाहरणार्थ र्थ
मुदाहरणम् तत्र नश्येदिति बोधयदिति वक्तव्ये बोधयेदित्यस्य गम्यमानत्वादप्रयोगः ततश्च राज्ञा
चंद्रेण सह विरुध्य स्वयं नाशक्रियया विशिष्टं तमः स्वकीयनाशक्रियया दृष्टान्तभूतया अन्योप्ये
वं राजविरुद्धश्चेन्नश्येदित्यनिष्टपर्यवसायिनमर्थं बोधयदेव नष्टमिति निबंधनादसदर्थनिदर्श
ना तथा उत्तरश्लोके सविता स्वोदयसमसमयमेव पद्मेषु लक्ष्मीमादधानस्तया पद्मश्रियाधानेन
क्रियया परान्प्रति समृद्धिफलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयन्निबद्ध इति सदर्थनिदर्श
ना यथा वा उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतः पृषत्कणश्चारु
मारुतधुतः पतत्यधः अत्र गिरिशिखरगतो वृष्टिबिंदुकणो मंदमारुतमात्रेणापि कंपितः प

एम
१७

तत्तल्पोत्तल्लनपदप्राप्तिः पतनहेतुरिति असदर्थबोधपर्यवसिद्धरत्पसदर्थनिदर्शना चूडामणिपदे धत्तेयो
देवं रविमागतम् सतां कार्य्यमिति येपीति बोधयन्गृहमेधिनः अत्र समागतं रविं शिरसा संभावयन्नुदयाचलः
स्वनिष्ठया रविधारणक्रियया समागतानां सत्तामेवं गृहमेधिभिरातिथ्यं कार्य्यमिति सदर्थबोधपर्यवसिद्ध
रतिसदर्थनिदर्शना अत्र केचिद्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयं मसंभवद्वस्तुसंबंधनिबंधनमिति
तित्तत्तीयात्तु संभवद्वस्तुसंबंधनिबंधने तित्यवहरंति तथाहि आद्यनिदर्शनायां वाक्यार्थयोरैक्यमसंभव
त्तयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनायामप्यन्यधर्मोन्यत्रासंभवत धर्मिणोः साम्ये पर्यवस्यति तृ
तीयनिदर्शनायां तु स्वक्रियया परान्प्रतिसदर्थबोधनं संभवदेव समत्तां गार्भीकरोति बोधयन्गृहमेधिन इत्या
दौ कालिको निरध्यापयतीति वत्समर्थाचरणेति च प्रयोगः तत्स्वक्रियया कालिकानिः शीतापनयनेन
वहूनध्ययनसमर्थान्करोतीत्यमते यथायं पर्वतः समागतं रविं शिरसा संभावयति एवं गृहमेधिभिः समागतः सं
रोति एवं वर्ण्यमानः पर्वतः स्वयमुन्नमनभावेन गृहमेधिनः उक्तबोधनसंपन्नः १

कु० नं० तमुचितपूजयासंभावयेरिति अतः संभवति बोधनसंबंधइति व्यतिरेकोविशेषश्चेदुपमानोपमेययोः शैलाइवो
१८ न्नताः संतः किंतु प्रकृतिकोमलाः अयमेवमेयाधिक्यपर्य्यवसायीव्यतिरेकः यथा वा पल्लवतः कल्पतरो
18 रेषविशेषः करस्यतेवीरमेषयतिकर्णमेकः परस्तु कर्णतिरस्कुरुते तन्न्यूनत्वपर्य्यवसायीयथा रक्तस्त्वं
नवपल्लवैरहमपिश्लाघ्यैः प्रियायागुणैः त्वामायांति शिलीमुखाः स्मरधनुर्मुक्तास्तथामामपि कांतापाद
तलाहतिर्भवदुदेतित्वमसाप्यावयोस्सर्वंतुल्यमशोक केवलमहं धात्रा सशोकः कृतः अनुभयपर्य्यव
सायी यथाददन्तरनिवृत्तमुदेः कोग्रानिवसस्यसहजमलिनस्य कृपणस्य कृपाणस्य च केवलमाका
सादिततमेकधर्मान्व रतोभेदः सहोक्तिः सहभावश्चेद्भासते सहजं जनः दिगंतमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह यथा वा
पित्वमिति भावत छायासंश्रयते तलं विटपिनां श्रांतैव पांथैः समं मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह आ राम
चामत्यहिमांशुदीधितिस्पृष्टैवलोकैः समं निद्रागर्भगृहं सहप्रविशति क्रांतैव कांताजनैः जन १८

रंजनरत्नोक्तेः अनेनैसार्द्धं विहरांबुराशौरित्यादौ न सहोक्त्यलंकारः विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीन
मुच्यते विना हृद्यापि साध्यापि विना विनयसंपदम् यथा वा यश्च रामं न पश्येत्तु यं च रामो न पश्यति निं
दितः स भवेल्लोके स्वात्माप्येनं विगर्हयेत् अत्र रामदर्शनं विना निंदितत्वम् विनाशब्दमंतरेणापि
प्रदर्शितम् तद्वत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते विना खलैर्विभात्येषा राजेंद्र भवतः सभा
यथा वा आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा मो
हेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधःपतनकलुषा गृह्णतीव प्रसादम् अत्र तमःप्रभृतीनि
विना निशादीनां रम्यत्वं विनाशब्दमंतरेण दर्शितम् समासोक्तिः परिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेत् अय
मैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमा यत्र प्रस्तुते वृत्तांते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तुतवृत्तां
तस्यापि परिस्फूर्तिस्तत्र समासोक्तिरलंकारः समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तांतयोर्वर्णना
त् उदाहरणमयमैंद्रीति अत्र चंद्रस्य प्राचीप्रारंभसंबंधलक्षणे उदये वर्ण्यमाने मुखशब्दस्य प्रा

कु० नं० भवदनसाधारणपाडकृशवस्याहरणकामुकसाधारणपाशुं वत्तीत्यस्यप्रस्तुतार्थसंबंधमात्रपरस्यश
१९ सार्थांतरस्यापारणात्तचंद्रमः शब्दगतपुंल्लिंगेन ऐंद्रीगतस्त्रीलिंगेनतत्प्रतिपाद्यं संबंधित्वेन चोप
19 स्कृताद्रप्रस्तुतपरवनितानायकवृत्तांतः प्रतीयते यथावा यौवनात्कुचभारमाकुलकचं व्या चलनर
चंचलः लोलत्तारावलिप्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदबिंदुकांबुजं श्रमवद्दत्तकरग्रहारमाधिकश्वासं रसा
देनयायस्मात्कंदुकसादरं सुभगया संसेव्यते तत्कृती अत्र कंदुकवृत्तांते वर्ण्यमाने प्रावल्यात्कु
चभारमित्यादिक्रियाविशेषणसाम्याद्विपरीतरतासक्तनायिकावृत्तांतः प्रतीयते पूर्वे च विशे
वृत्तांतसारूप्यात षणानि श्लिष्टानि रहसाधारणानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते यथा पुरापन्नस्रोतः
पुलिनमधुनातत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां बहोर्दृष्टं कालादपरमिव
मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति अत्रैव वर्णने प्रस्तुते तत्ताद्रूप्यात्कुटुंबिषु प एम
नसंतानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तांतः प्रतीयते अत्र च

षनर १९

वृत्तांतस्य रोपणम् प्रस्तुते

विशेषणसाम्यात्सारूप्याद्वा परः प्रस्तुतवृत्तांतस्यारोपणं तत्र कृते विशेष्ये तत्समासे यत्र सर्वथैव अप्रस्तुतस्य
मल्लः प्रस्तुतान्वयिनः कविसंरंभगोचरत्वायोगात् तत्रास्य समासोक्तावप्रस्तुतव्यवहारसमारोपस्याहृता
हेतुः ननु रूपक इव प्रस्तुते ऽप्रस्तुतरूपसमारोपोऽप्यस्ति मुखं चंद्र इत्यत्र मुखे चंद्रत्वारोपहेतुतद्वाचकचं
द्रशब्दसमभिव्याहारवदत्र एवं वक्तिचंद्रमा इत्यादिसमासोक्त्युदाहरणे चंद्रादेर्जारत्वारोपहेतोस्तद्वा
चकपदसमभिव्याहाराभावात् निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारा
निपातैः सह किंतु वांतमस्यं दुःखमित्यार्तनादं रणस्य इत्याद्येकदेशविवर्ति रूपकोदाहरणे इव प्रस्तुतेप्र
स्तुतरूपसमारोपगमकस्याप्यभावात् तत्र विद्युन्नयनैरित्यत्र निर्दिष्टपाणिग्रहणादृतपदार्थप्रधान(
मयूरव्यंसकादिसमासस्थितो उत्तरपदार्थभूतनयनान्वयानुरोधात् पयोदं कामुकमपि द्रष्टुम्बलात्रू
पणं गम्यमानं न चेह तथा निराकृतवता त्वया प्रागते किमपि वेपत एव सिंहीति श्लोके सेतुक
त्वादिवद्याप्रस्तुतासाधारणवृत्तांतनुपातोऽस्ति नापि श्लिष्टसाधारणादिविशेषणसमर्पितमोः प्रस्तुताप्र

कु॰ नं॰ स्तुतवृत्तांतयोरप्रस्तुतवृत्तांतस्य विशुद्धप्रयनवत्त्वाधान्यमस्ति येन तदनुरोधात्सोपदेऽनुक्तमपि दुष्टप्रकृतरूपत्वं
२० त्वं सेत्स्यते धनकुदित्यत्रेव प्रयोदश्त्यत्रेववानुक्तमपि प्रस्तुते प्रस्तुतरूपसमारोपमभ्युपगच्छेम तस्माद्विशेषण
20 समर्पिता प्रस्तुतव्यवहारसमारोपमात्रमिह चारुताहेतुः यद्यपि प्रस्तुताप्रस्तुतयोरिह श्लिष्टसाधारण वृत्तं तयोर
विशेषणसमर्पिततयोर्भिन्नपदोपात्तविशेष्ययोरिव विशेष्येणोव साक्षादन्वयादस्ति समप्राधान्यं
तथाप्यप्रस्तुतवृत्तान्तान्वयानुरोधात्तत्र प्रस्तुते प्रस्तुतरूपसमारोपोंगीकर्तव्यः तथाहि यथा
प्रस्तुतविशेषेणाप्यप्रस्तुतवृत्तांतस्यान्वयप्रयोगपत्ता तथैवाप्रस्तुते पिरोजादौ नास्ति प्र
कृतवृत्तांतस्यान्वयप्रयोगपत्ता एवं च समप्रधानयोः प्रकृताप्रकृतवृत्तांतयोरन्यतरस्याव
रूपमारोपेऽभ्युपगंतव्ये प्रस्तुत एव प्रस्तुतेऽप्रस्तुतवृत्तांतस्यारोपश्चारुताहेतुरिति युक्तम् नन्वेवं सति विशेषणसा
म्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनोऽप्रस्तुतस्य गम्यत्वं समासोक्तिरिति सा राम
घ्यत इत्यादीनि प्राचीनानां समासोक्तिलक्षणानि न संगच्छेरन् प्रस्तुते श्लिष्टसाधारणादिरूपविशेषणसमर्पिता २०

उणपूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तान्तसमारोपणात्तस्य चारुताहेतुत्वाभ्युपगमे न विशेषणसाम्यकृतः कामुका
द्यप्रस्तुतधर्मिव्यंजनानपेक्षणादिति चेत् उच्यते स्वरूपतोऽप्रस्तुतवृत्तान्तस्यारोपो न चारुताहेतुः किंच प्रस्तुतका
मुकादिसंबंधित्वेनावगम्यमानस्य तस्यारोपः तथाभूतस्यैव चारुत्वानुगुणत्वात् न च तावदवगमने विशेषणपदानां सा अवबोधने
मर्थ्यमस्ति अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपेण समर्पितेन वदनचुंबनादिना तत्संबंधिकामुकादाव
भिव्यक्ते पुनस्तदीयत्वानुसंधानं तत्र भवतीति चेत् स्वरूपतो दृष्टेन राजाश्वादिना तत्संबंधिनि राजादौ स्मारिते पुनरश्वा
दौ तदीयत्वानुसंधानवदिति विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्याप्यपेक्षा अत एवाप्ति
पृविशेषणयामिव साधारणविशेषणमात्रप्रस्तुतव्यवहारसमारोप इत्येव प्राचीनानां प्रवादः कंचुके
व्यालवनात्कुचभारत्वादिविशिष्टवनितात्वेन्यस्य कामुकसंबंधित्वेनैव समारोपणीयत्वात् स्वरूपतः कंदु
केऽपि तस्य सत्त्वेनासमारोपणीयत्वात् किंच सारूप्यनिबंधनत्वेनोदाहृतायां समासोक्तावप्रस्तुतवृत्तान्तस्या
ऽशाब्दार्थस्याप्रस्तुतवृत्तान्तरूपेणैवमप्रतीतेन रूपेण तत्र समारोपसिद्धेरन्यत्रापि तथैव युक्तमिति युक्तमेव प्रा
ता२ चीनानां लक्षणमिति विभावनीयम् अलंकारः परिकरः साभिप्रायैर्विशेषणैः सुधांशुकलितोत्तंसस्तापं हरतु वः
शिवः अत्र सुधांशुकलितोत्तंस इति विशेषणं तापहरणसामर्थ्याभिप्रायम् यथा वा तव प्रसादात्कुसुमायुधो

कु॰ पि सहायमेकं मधुमेव लब्ध्वा कुर्य्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोन्ये अत्रापि पिनाकपाणेरि
२१ ति हरविशेषणं कुसुमायुधपदस्य वीर्यस्य हर्म्यविशेषणं च सारासारवत्त्वाभिप्रायगर्भम् यथा वा सर्वाशु
21 चि निधानस्य कृतमस्य विनाशिनः शरीरकस्यापि कृते मूढाः पापानि कुर्वते अत्र शरीरविशेषणानि तस्य हेय
त्वेनासंरक्षणीयत्वाभिप्रायगर्भाणीति यथा वा ममा एवं नैकतया स्थितं श्रुतिगणं जन्मी न वल्मीकतो नाभौ(
नाम मवच्युतस्य सुमहद्वाष्ये च वाभाविधिं विचित्रार्थेन च कृत्कथा मम कथं संगच्छामि ना संगरुद्वैविककृष्ण
वेदं ददतोनि महं कर्तकियं ग्राकुपाम अत्र श्रुतिगणं नव्याहृत्यमित्यादीनि विशेषणानि स्वास्मिन्व्यासायसा
१५६ धारणकार्य्यकारणप्रतीतिमुखेन नाहं व्यासस्याभिप्रायगर्भाणीति तत्राद्योदाहरणयोरेकैकं विशेषणं स
मर्न्तनोदाहरणयोः प्रत्येकं बहूनि विशेषणानि तत्रापि प्रथमोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भा
णि पदार्थरूपाणि च द्वितीयोदाहरणे भिन्नाभिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चेति भेदः तेषु व्यंग्यार्थ
हरस्य सद्भावेपि न ध्वनिव्यपदेशः तापहारिणो तन्त्रस्य कौ मुख्यस्यापि न सर्वपदानि पैर्य्यभंजकत्वे शरीरस्यासार्थ
पापमाचरतो मूढत्वे स्वस्य वर्णनीयराजगणकथ्यनाशकत्वे च वाच्यएवोपस्कारकत्वादनानव्यंग्यार्थस्य राम
वाच्यपरिकरीत्वात् परिकर इति नामास्यालंकारस्य केचित्तु निष्प्रयोजनविशेषणोपादाने अपुष्टा २१

साभिप्राये

यदि दोषस्तोऽकृतत्वात्तत्प्रयोजनत्वे विशेषणस्य दोषाभावमात्रेण न कश्चिदलंकारः एकनिष्ठतादृशानेकविशे
षणोपन्यासे परं वैचित्र्यविशेषात् परिकर इत्यलंकारमध्ये परिगणित इत्याहुः वस्तुतस्तु अनेकविशेष
णोपन्यास एव परिकर इति न नियमः श्लेषयमकादिवत्पुष्टार्थत्वदोषाभावेन तत्रैकस्यापि विशेषणस्य
साभिप्रायस्य विन्यासे विच्छित्तिविशेषसद्भावात् परिकरत्वोपपत्तेः यथा अतियजेत निजां यदि देवतामु
भयतश्च्यवते जुषतेऽप्यघम् इति तिभक्तैव सदैवतकाननवनतानवता किमहिद्रुहा: अत्र प्रफुल्लतपूजो
पुरन्दरादीनां प्रतिभावतः कृष्णस्य वाक्ये गोवर्धनगिरिरेवास्माकं दैवतमिति स एव पूजनीयः क
नाऽस्तु कः प्रफुल्लतरस्येव पांवनवतेति गोवर्धनगिरेर्विशेषणस्य काननवत्वात् निर्झरादिमत्त्वात् पुष्पफ
लतृणजलादिभिरात्यकानामस्माकमस्मद्धेनूनां च गवामयमेव रक्षक इत्यभिप्रायगर्भम् एवमत्रैकस्यापि
ति साभिप्रायविशेषणविन्यासस्य विच्छित्तिविशेषात् काव्यत्वसिद्धावन्यत्रापि शुभ्रांशुकलितोत्तंस इत्यादौ तद्वा परिकरस्य
अलंकारत्वाभाव त्वलालाभो निवार्यते अपि चैकपदार्थहेतुकं काव्यलिङ्गमलंकार इति सर्वसंमतं तद्वदेकस्यापि विशेषणस्य
साभिप्रायालंकारत्वं युक्तमेव साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भु
जः अत्र चतुर्भुज इति विशेष्यम पुरुषार्थचतुष्टयप्रदाने सामर्थ्याभिप्रायगर्भं यथा वा फलं दिनेशाना
न

समाधवः सर्वदा पायात् योऽगं गोवर्द्धनं ... वीवाहुल्ये ... गादीधरत् स उमाधवः पायात् यः गंगामदीधरत् सः कथंभूतः सर्वदः २

कीलालशब्दो राजपक्षे रुधिरवाचकः समुद्रपक्षे जलवाचकः २

कुं०

२२ 22

कुलिशचिन्नं हैहयाधिपः वृषुमारवंलः सात्तात्काह मेषकृते गुणः करलीं द्रुदत्यादि विशेष्यपदानि सहस्त्रमुखेत्वाद्य
भिप्रायगर्भाणि नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः सर्वदोमाधवः पायात्स यो गंगामदीधरत् अब्जे
तत्वकमुखेंदुत्स्यं हरिणाहितसक्तिना उच्चरङ्गी कीलालः कुरुभे वाहिनीपतिः अनेकार्थविन्यासः श्लेषः सच
त्रिविधः प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च सर्वदेत्यादिना क्रमेणो
दाहरणानि तत्र सर्वदोमाधवइति स्तोतव्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनं प्रकृतश्लेषः अब्जं कमलमब्जे
श्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्र
समितौ शस्त्रप्रपातोत्थ तदुपरिस्थसेनापतेरेव वर्णनं प्रकृतमिति प्रकृताप्रकृतश्लेषः यथा वा नातः का
कोदरोयेन द्रोग्धापिकरुणात्मना पूतनामारणख्यातः समेस्तारतां विभुः नीतानामाकुलीभावं लुब्धैर्भूरिशि
लीमुखैः सदृशे वनवृद्धानां कमलानां त्वदीक्षणे असावुदयमारूढः कांतिमान्रक्तमंडलः राजा हरति
लोकस्य हृदयं मृदुभिः करैः अत्राद्ये स्तोतव्यत्वेन प्रकृतयो रामकृष्णयोः श्लेषः द्वितीये उपमानत्वेना
प्रकृतयोः पद्महरिणयोः श्लेषः तृतीये राज्ञि वर्णन प्रस्तावे प्रकृतस्य प्रत्यक्षोदितचंद्रस्याप्रकृतस्य न वा
चित्कनौ तेश्व श्लेषः यत्त्वप्रकृताप्रकृतश्लेषोदाहरणेषु शब्दशक्तिमूलध्वनिमिच्छंति प्राञ्चस्तत्र कृताप्र

हरितौ मृगेन सह आहितः कृतः सक्तिः संबंधो येन सः तेन० अब्जशब्दस्य चं द्राभिप्रायपक्षे पद्म पद्म पक्षे तु हरिणा सूर्येण आहितः कृतः सक्तिः सं बंधो येन स० तेन० ३

लु५

जले

कमलानां पद्मानां हरिणानां वा सदृशो त्वदीक्षणे कथंभूतानां वने वृद्धानां वने ऽरण्ये वृद्धानां पुनः कथंभूतानां लुब्धैर्भूरिशिलीमुखैर्भ्रमरैराकुलीभावं नीतानां लुब्धैर्व्याधैः भूरिशिलीमुखैर्बाणैराकुलीभावं नीतानाम ६

श्रीकृष्णपक्षे काकोदरशब्दः फणिवाचकः श्रीरामपक्षे काकः दर इति छेदः काकोजयंतः दरः भयप्राप्तः पूतनामारणख्यात इत्यस्य पूतं नाम यस्य रणे ख्यात इत्यर्थः ५

...प्रकृताप्रकृतश्लेषोदाहरणे असावुद ... इत्यो ऽरुणवर्णः मंडलः परिवेषो यस्य सः मृदुः मृदुभिः करैः किरणैर्लोकस्य हृदयं हरति उदयमारूढः सन् ... मंडलेन यस्य स राजा उदयमारूढः मंडलिः करैः ... लोकस्य हृदयं हरति ७

... ध्वनिमिच्छंति प्राञ्च इति यत्तत्र कृता भिधानमूलकस्य उपमादि लंकारस्य संपत्त्यभिप्राय तथाहि असावुदयमारूढ इत्यत्र उपजा ... [illegible]

वंजना २

कृताभिधानमूलकस्य उमादेरलंकारस्य व्यंग्यत्वाभिप्रायं तत्त्वप्रकृतार्थस्यैव व्यंग्यत्वाभिप्रायम्

...भिप्रायं म अप्रकृतार्थस्याभिशक्त्या प्रतिपाद्यस्याभिधेयत्वावश्यंभावेन व्यक्त्यनपेक्षत्वात् प्रकृतेपि प्र

रात्रिवर्णनवनात् कृतार्थे प्रकरणबलात् ह्यदेति बुद्धिस्थे सत्येव पश्चादल्पतिग्मांशुधनादिवाचिनां राजकरादिपदानां अत्यन्त

संनिधानबलात् तद्विषयशक्त्यन्तरोन्मेष. पूर्वकमप्रकृतार्थः स्फुरेत् नेतावतास्य व्यंग्यत्वं शक्त्या प्रतिपाद्य त्वा

मानेसर्वथैव व्यक्त्यनपेक्षणात् प्रकृते भवति तेप्रकृतार्थाभिधाने स्फुरतीति चेत् कामं गूढश्लेषो भवतु अ

रेवतकवर्णनमिदम् स्तिवाच्यत्वाविरूढ एतेवः यथा अयमतिजरठाः प्रकाममगुर्वीरनघुविलेविपयोधरोपरुद्धाः सतत

॥ मसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति मंदमानिमधुरर्ध्यमोपलादर्शितश्वपचुवाभवन्त चंद्रालवर्णनमिदम्

नमः स्पृशन्ति मिरजेस्तिष्ठोविरोधमोषधिपतेरसन्निधौ अत्र हि समासोक्त्युदाहरणयोः प्राकरणिके

र्थे प्रकरणवशात्क्लृप्तेतिबुद्धिस्थे विशेषणसाम्यादप्रकृतोपि वस्तुवेश्यावृत्तान्तादिः प्रतीयते तत्र समासो

क्तेर्गंधलेशरहितं सर्वथा नाभिमतएव एवमन्यत्रापि श्लेषे रूढे ध्वनिबुद्धिर्न कार्या यथा रम्या इति प्राप्तवतीः

पताकारागं विविक्तारतिबद्धपंक्तीः यस्यामसेवन्त ननैमद्वलीकाः समं वधूभिर्वलभीर्युवानः अत्रहितीयो

ताद्विविशेषणलाभार्थितां धर्तिताएणां नशावसामर्थ्येन वशात्भिरन्वयः विभक्तिरभेदात् तत्र विभक्तिभेदे

विजना वर्णलेदशनस्वंदिक् नतगंकी का ग् प्रसादोपतनगृहागति २

नमति वलीकानि ब्यादनपटल प्रांतावास्रो सा २

२३ पि तदन्वयात्तेपकं साधर्म्यमिह निबद्धमाश्रियतः एतस्मिन्नाधिकपद्यः श्रियं वहेत्यः संतोभेप वनभुवाजवेन
कु०नं० नीताः वाल्मीकेरहितं रामलक्ष्मणाभ्यां साधर्म्यं दधति तिरां महासरस्यः त्स्यैवासिमहत्तेजोभवेत् समभिव्य
क्तक्रियाका [illegible] विशेषणं सहार्थत्वेनाप्युपपन्ने वस्तुध्वनिः विशेषणानामन्वयात् प्रा[illegible]ण प्रतीतं साम्यार्थ
23 नाकं वतेतस्मादर्थसौन्दर्यबलादेवतरत्वयान्तसंधानमिति गूढश्लेषः तदुत्तमचूलादेव समशावस्यस
धर्म्यार्थत्वकल्पनम् इतिवाक्यस्येवोपमालंकारस्यांगमयं श्लेषइत्यत्र मतिमपेचेन तत्त्विश्लेषत्रे(
विषम् एवंश्लेषः प्रकारान्तरेणापि द्विविधः संपन्नः उदाहरणाय ते पुण्य जुकीलालवाहिनीत्यादिपाद्येषु
परस्परं विलक्षणं परमंगमनपेक्ष्य नानार्थीकोडीकारादभंगश्लेषः सर्वतोमाधवोपायां गां हरिणाहिता।
सक्तिनेत्यादिषु विलक्षणां परभंगमनपेक्ष्य नानार्थीकोडीकारात्सभंगश्लेषइति तत्र सभंगश्लेष [illegible]
[illegible]ः शब्दालंकारः अभंगश्लेषस्त्वर्थालंकार इति केचित् उभयमपिशब्दालंकार इत्यन्ये उभयमपि
अर्थालंकार इति त्वाभिप्रायः एतच्चकेवलं तु चिरमीमांसायां द्रष्टव्यम् अप्रस्तुतप्रशंसा स्यात्साय
त्र प्रस्तुताश्रया एकः कृतीशाकुनेषु पोतंशंका न्नपावसे कत्राप्रस्तुतवर्ततां तवर्णनं प्रस्तुतावगतिप राम
र्यवसायि तदप्रस्तुतप्रशंसालंकारः अप्रस्तुतवर्णनं तवर्णने न प्रस्तुतावगतिः प्रस्तुताप्रस्तुतसंबंधेस २३

न्य तत्र

त्तिभवति संवधश्च साद्रूप्यं सामान्यविशेषभावः कार्य्यकारणभावो वा संभवति तं सामान्यविशेषभावे सा
मान्याद्विशेषस्य विशेषात्सामान्यस्य वगतौ द्वैविध्यं कार्य्यकारणभावे पि कार्य्यात्कारणस्य कारणाद्वा कार्य्य
स्यावगतौ द्वैविध्यं साद्रूप्ये त्वेको भेद इत्यस्याः पंचप्रकाराः यदाहुः कार्य्ये निमित्ते सामान्ये विशेषे प्रस्तुते
सति तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंचधेति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणम् एकः कु
क तीति अत्राप्रस्तुतस्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्सरूपे क्षुद्रेभ्यो याचनान्निवृत्ते मानिनि
पर्य्यवस्यति यथा वा आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा मत्तेभकुंभत
टपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र शुनकस्य निंदा निंदनीयत्वेन प्रस्तुते तत्सरूपे
कृत्रिमवेषव्यवहारमात्रेण विदुषामभिनयति नैपथ्ये पर्य्यवस्यति यथा वा अंतश्छिद्राणि भूयांसि
कंटका बहवो वहिः कथं कमलनालस्य माभूवन्भंगुरा गुणाः अत्र कमलनालवृत्तांतकीर्तनं तत्सरूपे
वहिः खले पुजाग्रत्सु आत्मप्रज्ञा हिंसा कलहं कुर्वाणे पुरुषे पर्य्यवस्यति एवं चलस्यलक्षणायोः प्रशंसा
साधनर स्वदः स्तुतिनिंदास्वरूपाख्यानं कीर्तनपरोद्भवव्यः सामान्यान्निबंधना यथा विधाय वैरं सामर्षे नरो रिपु
उदासते नित्यिप्पो दर्चिषं कक्षे शेरते तेभिमारुतम् अत्र प्रागेव सामर्षे शिशुपालेन हन्तिरणीहरणादिना

मि:

कु० वैरं हठी कृतवता कुसुमेन तस्मिन्नुदासितुमयुक्तमिति व्यक्तेऽर्थे प्रस्तुते तत्प्रत्यायनार्थं सामान्यमभिहितम् य
२५ था वा सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषां परोक्षमिति को वेत्ति परीक्षानिकषोपलः अत्र यदि त्वं प्रत्य
24 क्षं सखे परोक्षेऽपि मम हितमाचरसि तदा त्वमुत्तमः सुहृदिति विशेषे वक्तव्यत्वेन प्रस्तुते सामान्यमभिहितम् वि
शेषनिबन्धना यथा अङ्कायितोपचितमृगस्वं द्रुमामृगस्त्वां क्वचन केसरी लिहतीति समृगयूथोपगणाधिपः अत्र
कृष्णं प्रति बलभद्रवाक्ये मार्दवरूषणाय पूर्वं प्राप्तवान् सारेण क्रूर एव दम्भेति भाग्यवति ननु मृदुरिति सा
मान्ये वक्तव्ये तत्प्रत्यायनार्थं प्रस्तुतो विशेषोऽभिहितः एवं बृहत्कथादिषु सामान्यतः कंचिदर्थं प्रस्तुत्य तद्दि
ढ्यार्थं प्रस्तुतकथाविशेषोदाहरणेऽपि प्रमेवाप्रस्तुतप्रशंसा द्रष्टव्या कारणनिबन्धना यथा हृतसारमिवें
दुमण्डलं दमयन्तीवदनाय वेधसा कृतमध्यविलं विलोक्यते धृतगम्भीरखनीखनीलिम अत्राप्राकरणिकेन्दुमण्ड
त लगततयोक्तेन रूपमात्रेण दमयन्तीवदननिर्माणार्थमंशाहरणेन तत्कार्यरूपो वर्णनीयतया प्रस्तुतो दमयन्ती कारणेन ४
वदनगतो लोकोत्तरसौन्दर्यविशेषः प्रतीयते यथा वा मदीयवरदराजस्तवे आश्रित्य नूनममृतद्युतयः पदं
ते देहसुधापतेने द्विष्पदाभिमुख्या लावण्यपुण्यनिचयं सुहृदित्वदास्यवित्यास्यपातिति मिहिरं प्रतिमासाभि
न्नाः अत्राप्राकरणिकचन्द्रगतत्वयोक्तेन रूपमात्रेण लावण्यपुण्यचयविन्यासेन कारणेन तत्कार्यमतेन कोटिन गुण
कर्तृक नि
२५

समभेदे पि२

चंद्रलावण्यस्य शालित्वमनन्यमसाधारणं भगवन्मुखे वर्ण्णनीयतया प्रस्तुतं प्रतीयते तथा हि चंद्रलाव
ण्यंतल्लिंगादृष्टितयाभेदाध्यवसायात् प्रतिमासभिन्नत्वेन वर्णितः तेनातीतानागताद्यनंतकोट
यस्तिलक्ष्म कालस्थानादिभेदात् सर्वेषां च तेषामाकाशसमाश्रयत्वं श्लेषमहिम्ना भगवच्चरणस
माश्रयणत्वेनाध्यवसितं भगवच्चरणप्रपन्नानां चादेहस्तयोपाष्ठितो परमपदप्राप्त्याभिमुख्यं तद
नीमेव स्वस्वदेहदुर्गस्वकीयसुकृतलोमनिवेशनं ततः सूर्य्यमंडलप्राप्तिस्थित्वेतत्सर्वं श्रुतिसिद्धमिति
तदनुरोपेनतत्ते बोदेहस्य कालस्याभावात्स्याहृदयस्योपाष्ठितो सूर्य्यमंडलप्राप्तेः प्राक्प्रत्यन्तति
र्ध्वं प्राप्यत्वेन निरूपितस्य लावण्यस्य [illegible] प्रहाणं तिमिती कल्पतस्यचंद्रस्य दृश्यस्वरूपतोप
रिचितत्वं मोहादेवति भगवन्मुखेन्यसनमुत्प्रेक्षितम् यद्यपि मुहुर्मुहुस्त्वे तावत्त्वलावण्यसंक्रमणं
भवति तथाप्यत्र मुहुरित्येकवचनं भगवन्मुखमेव चंद्रस्य मुहुर्भूतं न मुखांतराणि चंद्रसादृश्य
गोचरस्यापदानीति भगवन्मुखस्येतरमुखेभ्यो व्यतिरेको व्यंजितः ततश्च तस्मिन्नेव सर्वेषां चंद्राणां
स्वस्वयावल्लावण्यविन्यसनोत्प्रेक्षणेन प्राप्यवर्त्तितः प्रस्तुतोर्थः स्पष्टमेव प्रतीयते यद्यपि ग्रंतो
सूर्य्यमंडलप्राप्त्यनंतरं भाविविरजानदपतिक्रमणानंतरमेव मुक्तत्सुकृतसंक्रमणं प्रयते तथापि
शारीरकशास्त्रे तस्यार्थवशात्प्राग्भावः स्यादिति तद्गति तदनुसारेण विन्यसस्य मिहिरं यातीत्युक्तं कार्य्य एम

कु० निबंधनाय यथा नाथत्वदंघ्रिनखपावनतोयलग्नास्तत्कांतिलेशकणिकाजलधिं प्रविष्टाः । ता एव तत्
२५ स्य मथनेन घनीभवंत्यो नूनं समुद्रनवनीतपदं प्रपन्नाः ॥ अत्र भगवत्पादांबुजनखालनतोयस्य कांति
25 व्यसतीति अलक्तकरसादिलग्नानां तया सह समुद्रं प्रविष्टानां नखकांतिलेशकणिकानां प
रिणामतया संभाव्यमानेन समुद्रनवनीतपदवाच्येन चंद्रेण कार्य्येण तन्नखकांत्युत्कर्षः प्रतीय
ते यथा वा अस्यास्रष्टुः कृति सौकुमार्य्यमधुना हंसस्य गर्वैरलं संलापो यदि साम्प्रतं परभृते वाचंय
मत्वं व्रतम् । अंगानामकठोरता यदि दृषत्प्रायेव सा मालती कांतिश्चेत्कमला किमत्र बहुना काषायमालं
बिताम् । अत्र नायिकागतत्वादिषु वर्णनीयत्वेन प्रस्तुतेषु हंसादिगतगर्वपरित्यागादिरूपाण्यौचित्येन संभा
व्यमानि कार्य्याणि क्रमेणाभिहितानि एतानि च पूर्वोदाहरण इव न वस्तु कार्य्याणि किंतु तत्तन्निरीक्षणका
र्य्याणि लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः । तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रि
यत्वं शिथिलं चमर्य्यः ॥ इत्याद्युदाहरणं तदेतच्चैव स्पष्टम् । अंगानामकठोरतेति तृतीयपादे तु वर्णनीयां
गसौकुमार्य्यनिरीक्षणकार्य्यत्वमपि नार्थमालतीकठोरत्वे विवक्षितं प्रतियोगिविशिष्टापेक्षकठोरत्वे तत
दकार्य्यत्वात् किंतु तद्धेतुरेव इदमपि त्वदंगमार्दवे दृष्टे इत्याद्युदाहरणे तच्चैव स्पष्टम् । अथ हेतुकार्य्यत्वस्य
बुद्धेः कार्य्यत्वेपि कार्य्यनिबंधनत्वं हीयते इति तादृशान्यपि कार्य्यनिबंधनप्रस्तुतप्रशंसायामुदाहृता राम

ति नो

२५

निप्राचीनैः वस्तुतस्तु तदतिरेकेपि न दोषः नह्यप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति
नियंतुं शक्यते संबंधांतरेष्वपि तद्दर्शनात् यथा तत्पत्रयो बंध पारस्पतवास्मितस्य निःश्वास मंदमरुता वित
ची कृतस्य एते कडंकर चयाइव विप्रकीर्णा जैवातृकस्य किरणा जगन्ति भ्रमंति अत्र ह्यप्रस्तुतानां चंद्रकि
रणानां भगवत्मंदास्मितरूपदिष्टो बंधधान्यविशेषकडंकरचयत्वोत्प्रेक्षणेन भगवन्मंदास्मितस्यत
स्मात्ताहृपः कोप्युत्कर्षः प्रतीयते नच धान्यकडंकरचययोः कार्य्यकारणभावादिसंबंधोस्ति अतः
सहोत्पत्त्यादिकमपि संबंधांतरमाश्रयणीयम् एवमुपमानोपमेयभावमाश्रित्य तत्र कविकल्पितका
र्य्यकारणभावनिबंधने प्रस्तुतप्रशंसोदाहृति ततोन्यत्रापि दृश्यते यथा कालिंदि ब्रूहि कुंभोद्भवजलधि
रहंनाम गृह्णासि कस्मात् शत्रोर्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः मालिन्यं तर्हि कस्मादनुभ
वसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कुपितः कुंतलक्षोणिपालः अत्र किमा
सां समकुंतलक्षोणिपाल तत्कारणमभिहितमिति कारणनिबंधना मालवान्प्रति प्रास्थितेन कुंतलेश्व
रेण किं ते निर्जिता इति पृष्टे तद्धानंतरमाविजलापि नर्मदा प्रश्नोत्तररूपकार्य्यमभिहितमित्यत्रैवं
कार्य्यनिबंधनापि पूर्वस्यां प्रष्टनःशाब्दः अस्यामार्थ इति भेदः प्रस्तुतेन प्रस्तुतस्य योतने प्रस्तुतांकु
रः किं भृंगासत्यां मालत्यां केतक्या कंटकेद्धया यत्र प्रस्तुतेन वर्ण्यमाने नाभिमन्यते प्रस्तुते योत्यते
समजनीति मालवीनां तथा ते स्तस्यति निःपृष्टे तद्धानंतरम् [illegible] मनाख्यो यकुपितः ५
मत १

ण

तत्रप्रस्तुतोकुतोलंकारः उत्तरार्द्धमुदाहरणम् इहप्रियतमेनसाकमुद्याने विहरंतीकाचिदंगंप्रत्येवाहेतिवा
त व्याचेस्यप्रतौवं नत्वानामंत्रणीयामंत्रणेनवाच्यासेभवादप्रस्तुतमेववाच्यमिहसरूपप्रस्तुतोगतयेव
ष्टा निर्दिष्टमितिवाच्यम् मोग्ध्यादिनाभेदेवाप्यामंत्रणस्यलोकेदर्शनात यथा कस्त्वंभोकथयामिदैवह
तकंमोविद्धिशाकोटकंवेणशादिवबहिसाधुविदित्तंकस्मादिदंकथ्यते वामेनात्रवटत्तमध्वजेगेनः
सर्वात्मनासेवतेनच्छायापिपरोपकारकरणीमार्गोस्थितस्यापिमे इत्यत्रचेतनाचेतनप्रश्नोत्तरनतिप्र्व
गामंत्रणस्यात्यंतमसंभावितत्वाभावात् एवंप्रस्तुतेनवाच्येनभंगोपालंभरूपेणपत्याकुलवध्वासोद
र्प्पाभिमानशालिन्याः क्रूरजनपरिचितदुष्पापायांपावनितायांविटसर्वस्यापहरणेसेकल्पदुरासद
यांवावेश्यायांकंटकसंकुलकेतकीकल्पायांप्रवर्तमानंप्रियतमंप्रस्तुपालंभोद्योततेयथावा अ
अस्यामुत्तावदुपमर्दसहासुभंगलोलंविनोदयमनःसुमनोलतासुवालामजातरजसंकलिकामकालेव्यर्थं
कदर्थयसिकिंनवमालिकायाः अत्राप्युद्यानमध्येचांतंभंगंप्रत्ययमुपालंभइतिवाच्यार्थस्यापिप्रस्तुतत्वं
दृष्टंचप्रौढांगनासुविद्यमानासुवालिकांतोयेत्क्लेशयतिकामिनिश्रुत्एवतिकस्याश्चिद्धिदग्धायाःवचनमिति
तंप्रस्तुपालंभोद्यते यथावा कोयंद्रुहदामियंदधातिनालिनीकांदंवचंचुरतंधत्तेचूतलतानवांकिसलयंपु राम
स्कोकिलास्वादितं इत्याकर्ण्यमिथःसखीजनवचःसादीर्घिकापात्तटेचेलांतेनतिरोदधेस्तनतटंविवा २६

ढूः

धरं पाणिना। अत्र हस्यमिति नलिनीव्यक्तिविशेषनिर्देशेन दीर्घिकायाः लक्षणत्वेन वाच्यार्थस्याप्रस्तुतत्वं स्पष्टम्
प्रस्तुतं तदर्थो तनं च स्वरूपमेव कविना आविष्कृतमस्तु।। अत्राद्योदाहरणयोरस्यापदेशस्य निमाहलोच
नकारः अप्रस्तुतप्रशंसायां वाच्यार्थे प्रस्तुतत्वादवर्णनीयत्वे इति तत्राभिप्रायमपर्यवसितायां तेन प्रस्तुता
र्थाक्षिप्तेः कारः इह तु वाच्यस्य प्रस्तुतत्वेन तत्राभिप्रायापर्यवसितायामर्थे सौन्दर्यवलेनाभिमतार्थव्य
क्तिर्ध्वनिरेवेति वस्तुतस्तु अलंकारत्वेन तु ध्वनिरिति व्यवस्थापितं चित्रमीमांसायाम तृतीयोदाहरणस्य
त्वलंकारत्वे कस्यापि न विवादः उक्तं हि ध्वनिकृता शब्दार्थशक्त्याक्षिप्तोऽपि व्यंग्योऽर्थः कविना पुनः यत्राावि
ष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति एतानि सामान्यनिबंधनान्युदाहरणानि सर्वं धोततनिबंधनान्य
पि कथंचिद्व्यंग्ययोः प्रस्तुतत्वेन तेनोदाहरणीयानीति दिङ्मात्रमुदाह्रियते यथा: शिवा काचन संनि सन्निमवति
पते विलोचने जाग्रतमप्रमत्ते समानधर्मा युवयोः सकाशे सखो भविष्यत्यचिरेण काश्चित् अत्र शिवसा
रूप्यमिव तदेकदेशतया तच्छायं भाललोचनमपि शिवरात्रिमाहात्म्यप्रयुक्तत्वेन वर्णनीयमिति तत्स्
वे न कृत्स्ने शिवसारूप्यं गम्यं यथा वा वहन्ती सिंदूरं प्रबलकबरीभारतिमिरत्विषां वृन्दे वन्दीकृतमिव नवी

लहरी२ परी

कु० ल० नाकेर्कशाणं तनोत्रुत्तेमं न स्तवत्वदनसौंदर्य्यलहरीवाहस्रोतस्सरात्तिरिवसीमन्तसरणिः अत्रवर्णनीयत्वेन
२७ प्रस्तुतायाः सीमन्तसरणेर्वदनसौंदर्य्यपरीवाहत्वोत्प्रेक्षणेन परिपूर्णतटाकवत्परीवाहकारणीभूता त्वस्या
27 ने अमांतीवदनसौंदर्य्यसमृद्धिः प्रतीयते सापि वर्णनीयत्वेन प्रस्तुतैव यथा वा अंगासंगि मृणालकांडमयत्ते भंगवति
श्रेषां हन्त नासामौक्तिकमिंद्रनीलसरणिं श्वासानिलाः प्रहन्ते दत्तेयं हिमवालुकापि कुचयोर्धत्ते दशां दीपतां तस्मा
यः पतितां वुवत्कर तले धारणं संलीयते अत्र नायिकाया विरहासत्त्वातिशयप्रकटनायसंतापवत्कार्याणि । ह
मृणालम्लानत्यादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मुखेन संतापोऽवगम्यः यत्र कार्य्यमुखेन कारण
स्यावगतिरपि निबन्धानत्त्राप्यमलंकारः किंत्वनुमानमेव यथा परिम्लानं पीनस्तनजघनसंगादुभयतस्तनो
र्मध्यस्यांतः परिमिलनमप्राप्य हरितम् इदं व्यस्तन्यासं प्रतिशिथिलभुजाक्षेपवलनैः कृशांग्याः संतापं वदति ।
निलिनी२ नीलिनीपत्रशयनम् ननु प्रस्तुतकार्य्याभिधानमुखेन कारणागम्यत्वमपि प्रस्तुतांकुरविषयमेव तत् किं तर्हि
पर्य्यायोक्तमित्याकांक्षायामाह पर्य्यायोक्तं तु गम्यस्य वचोभंगयंतराश्रयं नमस्तस्मै कृतौ येन मुधा राहुवधू राम
कुचौ यद्देनगम्यं विवक्षितं तस्यैव भंग्यंतरेण विवक्षितरूपादपि व्याहृतत्वेन केनचिद्रूपांतरेणाभिधाने पर्य्या २७

योक्तम् उत्तरार्द्धमुदाहरणम् अत्र भगवान्वासुदेवः स्वासाधारणरूपेणाम्यः राहुवधूकुचवैयर्थ्यका
रकत्वेन रूपान्तरेण स एवाभिहितः यथा वा लोकं पश्यति यस्यां श्रिः स यस्यां श्रिं न पश्यति ताभ्यामप्यपरिच्छे
स्वा द्या विद्या विश्वगुरोस्तव अत्र गौतमः पतञ्जलिश्चैतासाधारणाम्यो रूपान्तरेणाभिहितौ यथा वा निवेद्यतां (रूपाभ्यां २
हंत समापयंतौ शिशिरकोशा मदिमाभिधानं पादौ कि यद्दूरं मिमौ प्रयाते निधित्सते नु वदयंनमत्ते अत्र
किंयद्दूरं जिगमिषेतिगाम्य एवार्थो रूपान्तरेणाभिहितः यथा वा देवं वंदे जलधिशरधिं देवतासार्वभौमं व्यास
प्रष्ठा भुवनविदिता यस्य वाहाधिवाहाः भूतापेटी भुवनमध्यं पुष्करं प्रख्याताटीश्नारीपालाः श्रान्तमाव
ग मात्वाश्छेदनदुर्मनीषैः अत्र यस्य वेदा वाहा भुजंगा भूषणानीत्यादितत्त्वार्थस्य व्यवाप्तितौ वेदत्वाद्या
ग कारेण बन्धस्य एव वेदाद यो व्यासप्रभु विवितेयत्वाद्याकारेणाभिहिताः यत्तु देवतासर्वभौमस्युरीकरणाय
विशेषणविशेष्यभावव्यत्यासेन प्रतिपादिताः अलंकारसर्वस्वकृता विपर्ययोक्तस्य संप्रदायागतमिदं (
मेवलक्षणमंगीकृतं गम्यस्यापि भंग्यंतरेणाभिधानं पर्यायोक्तमिति चक्राभिपात प्रसभात्तये वचकार
यो राहुवधूजनस्यालिंगनोद्दाम विलासवंध्यं रतोत्सवं चुम्बनमात्रशेषं मिति प्राचीनं तदुदाहरणं व्याख्याय यो

कु० ल० जितं राहुवधूनां तेन विशिष्टेन रतोत्सवेन राहुशिरःच्छेदःकारणरूपो गम्यत इति एवं चास्यैवाभिधान
२८ मिति लक्षणानुपपत्तिमाशङ्क्य मिति यतस्तस्यैवाभिनायोगात्कार्यादिद्वारेणैवाभिधानं लक्षणेऽपि व
28 दितमिति लिक्षमपि लक्षणात्यायोजितम् लोचनकृतापि पर्य्यायोक्तं यदन्येन प्रकारेणाभिधीयत इति
इदमेव लक्षणमङ्गीकृत्य तदुदाहरणं च कार्यत्वाध्यवसायाभिहितेन कारणं व्यङ्ग्यं सम्यक् प्रदर्श्य तत्र लक्षणं
लक्षणामचलितमानात्यायोजितम् वाच्यादन्येन प्रकारेण व्यङ्ग्येनोपलक्षितम् यदभिधीयते तत्प
र्यायेण प्रकारान्तरेण व्यङ्ग्येनोपलक्षितमुक्तमिति सर्वोऽयं क्लेशः किमर्थमिति न विद्मः दार्ष्टान्तिकेहा
न्यस्यैव रूपान्तरेणाभिधाने तद्रूपमुदाहरणमिति चक्राभिघातप्रसभाज्ञयैवेति प्राचीनोदाहरणमपि स्वरूपे
णागम्यस्य भगवतो रूपान्तरेणाभिधानसंभवात्सुयोजमेव यत्तु राहुशिरश्छेदावगमनं तत्र प्रागुक्तरीत्या प्रस्तु
तीकृत एव प्रस्तुते न राहोः शिरोमात्रावशेषेणोत्तिंगतं वध्यत्वा पापादनरूपेणाच्छेभगवतो रूपान्तरे उपपं
पादिते तेन भगवतः स्वरूपेणावगमनं पर्यायोक्तस्य विषयः पर्य्यायोक्तं तद्यथा हुर्यद्व्याजेनेष्टसाधनं राम
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह अत्र नापि कोनाप केन संगमप्रचूतलतादर्शनव्याजेन।
यत्पर्यायेनेष्टसाधनं तत्रापि पर्यायोक्तं भवति २ २८

निर्गर्वत्वात्सख्या तत्त्वावबोधसंपादनरूपे घ्रसाधनं पर्य्यायोक्तं यथा वा देहि मत्कंदुकं राधे परिधाननि
गूहितमिति विश्रब्धं सपत्नीं वीक्ष्य कृष्णो हृदेतु वः। पूर्वत्र परोक्षसाधनं पर्य्यायोक्तम् अत्र कंदुक
सद्भावगोपनार्थं नीवीविश्लेषणव्याजेन स्वेष्टसाधनमिति भेदः। उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां
स्तुतिनिंदयोः कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं साधूक्तिपुनः साधु कर्त्तव्यं किमतः परम्
यन्मदर्थे विलूनानि दंतैरपि नखैरपि निंदया स्तुतेः स्तुत्या निंदाया वा अवगमनं व्याजस्तुतिः कः स्व
र्धुनि इत्युदाहरणे विवेको नास्तीति निंदाव्याजेन गंगायाः स्तुतिर्वदेव महापातकिनोपि स्वर्गं नयतीति।
व्याजरूपनिंदया तत्प्रभावातिशयस्तुतिः साधूक्तीत्युदाहरणे मदर्थे मियं तं क्लेशमनुभूतवत्यसी
तिव्याजरूपया स्तुत्या मदर्थं नगता तिरं तु मे व गता। सिपिकत्वां दूतिकाधर्मविरुद्धकारिणीमिति निंदा
वगम्यते यथा वा कलेशो यर्ष्यमरो योद्धुं त्वय्येकैसन्निमागच्छिते सप्तसप्तिसमारूढा भवंति परिपंथि
नः अर्द्धदानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतम् देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति गंगा
सागरमंबरं शशिकला नागाधिपः क्ष्मातलम् सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनम् अत्रो

निंदास्तुतिभ्यां यत्र स्तु
तिनिंदयोर्व्यक्तिः सत्र व्याज
स्तुतिः यत्र निंदया स्तुतिर्ग
म्यते नस्तुति व्याजस्तु
तिरिति समासः यत्र
स्तुत्या निंदा तत्र व्याज
एव स्तुतिरिति समासः
२

कु० नं०
२२
२५

दाहरणोस्मत्समुज्झितपदगतप्रतीपमूल निंदाव्याजेन स्तुतिर्गम्यते इति योदाहरणोऽत्र सर्वैषितवती सीतिया सा स्तु सर्वज्ञः
जत्वाब्याहूपया मदीयजैडुष्यादिदारिद्र्यादि सर्वं जानन्नपि वसुप्रदानेन रक्षितुं शक्तोऽपि महराम किमपि न
ददासीति निंदा व्यज्यते सर्वमिदं निंदास्तुत्योरेकविषयत्वेनोदाहरणम् भिन्नविषयत्वेन निंदया स्तुत्य
भिव्यक्तिर्यथा कस्त्वं वानर रामराजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः सह हनुमान् निर्द
ग्धलंकापुरः वद्धो राक्षससूनुनेति वहुशः संताडितस्तर्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति
न ज्ञायते अत्र हनुमान्निंदया रतरवानरस्तुत्यभिव्यक्तिः स्तुत्या निंदाभिव्यक्तिर्यथा यद्वक्रं मुहुरीक्ष
से न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान् प्रत्याशया धावसि काले बालतृणा
नि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किं नाम तप्तं तपः अत्र हरिणस्तुत्या राज
सेवानिर्विण्णस्यात्मनो निंदा व्यज्यते अप्रस्तुतप्रशंसाविशेष इत्यलंकारसर्वस्वकारः तेन हि सा अलंकारसर्वस्वकारे
रूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणमंतरं वैपरीत्येन विदृश्यते यथा धन्याः खलु वने वाताः कह्लार राम
सुखशीतलाः राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः अत्र वाता धन्या इत्यप्रस्तुतार्थोदहते धन्या २८

इति निंदायां स्तुत्यां प्रतिपादितं तल्लोदाहरणं दारहरणं दर्शितमिति यथोक्तं २

यथा पूर्वं मयाप्रस्तुतप्रशंसा येन प्रकारा उक्तः स्यात् प्रस्तुत गतस्तु त्याति निंदा या उक्ता सा प्रस्तुत प्रशंसा विशेषो भवतीति यद्वक्रं मुहुरीक्षसे इत्यालंकार सर्वस्वकारो वदति

शा२ व्याजस्तुतौ ४

वैपर्येल १ इति प्रस्तुतार्थः प्रतीयते इति स्तुत्यादितम् रूपमेवाप्रस्तुतप्रशंसानकार्य्यकारणे निबंधनेति दंडीयदाह। यस्या अस्तुते नेवात्र
अप्रस्तुतप्रशंसा स्यादप्रकांडे तु या स्तुतिः। सुखं जीवंति हरिणाः वनेष्वपरसेविनः। अर्थैरयत्नसुलभै उक्ताप्रस्तुतप्रशंसातोऽ
र्जलदर्भांकुरादिभिः। सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते। राजानुवर्तनक्लेशनिर्विण्णेन मनस्विना। तिरिक्ता याऽउदाहरणं वदति
ति नन्वनयोस्तत्र व्याजस्तुतिरित्येव युक्तम् स्तुत्या निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यवि दंडी तस्याउदाहरणमाह
व्याजस्तुतौ वैचित्र्यवि शेषविशेषसद्भावात् अन्यथाप्रतिव्याजस्तुत्युदाहरणेषु अप्रस्तुताभ्यां निंदास्तुतिभ्यां स्तुतिनिंदे प्रस्तुते अप्रस्तुतप्रशंसेति १
शेषविशेषसद्भावेऽपि गम्येते इत्येतावता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात् एवं चानया प्रक्रियया यत्रान्यगतस्तुति।
अप्रस्तुतप्रशंसाख्या विवक्षया न्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव अन्यस्तुतिव्याजेन तदन्यस्तुतिरित्यर्थाविशेषात् ग
कारे ५ म्यत्वात् यथा वा शिविविरिंचिकृते नाम कियच्चिरं किमभिधानमसावकरोत्तपः। तरुणि येन तवाधरपा
टलं दशति विंबफलं शुकशावकः। अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते
निंदाया निंदयाभिव्यक्तिर्व्याजनिंदेति गीयते। विधेः स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः। अत्र हरनिंदया

कुं०नं० विषमविपाकंसंसारं प्रवर्तयत्तो विधेर्निंदाभिव्यंग्या व्याजनिंदा यथा वा विधिरेव विशेषगर्हणीयः करटत्वं
२० रटकस्तव परोपः सहकारतरौ च काकोयोऽसौ सहवासं सरलेन कोकिलेन अन्यस्तुत्याऽन्यस्तुत्याभिव्यक्ति
30 रिति पंचमप्रकारव्याजस्तुतिप्रतिबंदीभूतेयं व्याजनिंदा तत्र यत्रान्यस्तुत्यान्यस्तुतिरन्यनिंदयान्यनिं
दा च प्रतीयते तत्र व्याजस्तुतिव्याजनिंदालंकारयोरप्रस्तुतप्रशंसोदाहरणेष्वप्र
अप्रस्तुतप्रशंसोदाहरणं नाम स्तुतप्रशंसा न वक्तव्या तेषामपि व्याजस्तुतिव्याजनिंदाभ्यां क्रोडीकरणसंभवादिति चेन्न उच्यते य विषयीकरणात्प
त्राप्रस्तुतवृत्तांतादप्रस्तुतनिंदारूपात्तत्स्वरूपः प्रस्तुतवृत्तांतः प्रतीयते अंतःच्छिद्राणि भूयांसि कं
टका बहवो बहिरित्यादौ तत्र लब्धावकाशा सारूप्यनिबंधना प्रस्तुतप्रशंसा तत्रोप्रवर्तमाना न पि
निवारयितुं शक्या अन्यस्तुत्यान्यस्तुतिरन्यनिंदयान्यनिंदेत्येवं व्याजस्तुतिनिंदयोऽपि संभवतस्त्वेत्त
कामं तेऽपि संभवेतां न त्वस्याः पत्त्याः यथापि विधिरेव विशेषगर्हणीय इति श्लोके विधिनिंदया
तन्मूलककाकनिंदया वा विशेषतस्तस्य प्रभोस्तेनच विद्वत्समतया स्याऽपि तस्य मूर्खस्य च निंदाऽप्यप्र त्म

कथं कमलनालस्य मा भूवन्भंगुरा गुणा अत्र कमलनालवृत्तांतकीर्तनं तत्सहस्वेव द्विः खलेषु जातः आत्मनि विनिंदितः कलहं कुर्वीत पुरु २०
नान्येऽपि च स तिरस्कृत आपर्लोकमलवृत्तांतादप्रस्तुतादशापुरुषस्य निंदारूपतत्स दृशवृत्तांतः प्रतीयते अत्र लब्धावकाशाऽप्रस्तुतप्रशंसा एकः कृती कुंतेऽपि
त्यादौ प्रवर्तमाना निवारयितुमशक्या

प्रतीयते इति सारूप्यनिबंधना प्रस्तुतप्रशंसाप्यत्र तथापि सैव व्याजनिंदामूलेति प्रथमोपस्थिता सा वि(साहस्यनिबंधनाप्र
तंत्रं दुर्वारं एवं च व्याजनिंदामूलकव्याजनिंदारूपेयमप्रस्तुतप्रशंसेति चमत्कारातिशयः एवमेव व्याज स्तुतप्रशंसा १
स्तुतिमूलकव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसा दृश्यते यथा लावण्यद्रविणव्ययो न गणितः क्लेशो महान्
र्जितः स्वच्छंदं चरतो जनस्य हृदये चिंताज्वरो निर्मितः एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता को
र्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां तन्वता अत्राप्रस्तुतायाः स्तुतायाः स्त्रीनिंदाव्याजेन तन्नि दीनाः
दाव्याजेन च तत्सौंदर्यप्रशंसा प्रशंसनीयत्वेन कविविवक्षिता अपाः स्वकविता पाः स्त्रीनिंदाव्याजेन
तन्निंदाव्याजेन चमत्कारातिशयप्रशंसापर्यवस्यति अस्य च प्रकरणस्य वाच्यार्थविषये यद्यपि ना
यं तत्समं जन्ये नहीमे विकल्पा नीरसत्वस्येति कल्पयितुं शक्यते रसानुगुणत्वात् वीतरागहृदयस्य एवं
विधविषये च प्रवृत्तेश्च नापि नागरिकस्य इति युज्यते तृतीयविकल्पे युवतकीर्तिकृपणता लिंगितस्य हृते
त्पमेतालोपहृतस्य वचसोऽनुचितत्वात् तुल्यरमणाभावादित्यस्यानुपपत्तेः मनुचितत्वाच्च स्वात्मनि तत्
दनुरूपतासंभावनायामपि वीतरागित्वे हि प्रश्नप्राप्तत्वात् तथापि विवक्षितप्रस्तुतार्थोपपत्तोपां नकिं

कु०नं. चिदसामंजस्यम अत एवास्य श्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तम प्राचीनैः व्याख्यासंभवेप्यप्रस्तुतप्रशंसोपप
३१ स्वयमुक्तस्य विचारणात प्रतिषेधः आक्षेपो भवति २ 31 त्तेरिति आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात चंद्र संदर्शयात्मानमयं वास्ति प्रियामुखम अत्र प्राप्ति
स्य चंद्रस्य प्रियामुखसत्वेन कैमर्थ्यं विचार्य्य अयमेत्यादिसूचितः प्रतिषेध आक्षेपः यथा ना साहित्यपा
यो निधिमंथनो स्यं कर्णामृतं रक्षत हेकवींद्राः यत्तस्य दैत्या इव लुंठनाय काव्यार्थचोराः प्रगुणीभवंति (गुणीभवंति) गृह्णं
तु सर्वेय दिवापयेखं नास्ति क्षतिः कापि कवीश्वराणाम रत्नेषु लुप्तेषु बहुष्वमर्त्यैर द्यापि रत्नाकर एव सिंधुः अ
त्रापि प्रथमपद्ये नोकेन प्रार्थितस्य काव्यार्थचोरेभ्यो रक्षणस्य पश्चाल्लिखितवैचित्र्याणां समुद्रगतरत्नजा
लवद्रूपत्वं विचिंत्य प्रतिषेध आक्षेपः निषेधाभासमाक्षेपं बुधाः केचन मन्वते नाहं दूती तनोस्तापस्त
स्याः कालानलोपमः केचिदलंकारसर्वस्वकारादय इत्थमाहुर्न निषेधमात्रमाक्षेपः किंयो निषेधः र्वधित तु उ
सन् अर्थांतरपर्यवसितः किंचिद्विशेषमाक्षिपति स आक्षेपः यथाहूत्याउक्तो नाहं दूतीति निषेधो वाधितत्वा राम
दाभासरूपः संघटनकालोचित कैन बचचनपरिहारेणयथार्थवादित्वेपर्य्यवस्यान्नि रानीमेवागत्य ना ३१

पिकाउज्जीवती येति विशेषमात्तिपत्ति यथा वा नरेंद्रमौलेन वयं राजसंदेशकारिणः जाग्रत्कुटुंबितामेत्य नशत्रुः
कश्चिदिष्यते अत्र संदेशहारिणामुक्तौ न वयं संदेशहारिण इति निषेधोऽनुपपन्नः संधिकालोचितकेतववचनप
रिहारेण यथार्थवादित्वेऽपर्यवसानात् सर्वजगतीपालकस्य तवन कश्चिदपि शत्रुभावेनावलोकनीयः किंतु स
र्वेऽपि राजानो भृत्यभावेन संरक्षणीया इति विशेषमात्तिपत्ति आक्षेपोऽन्यो विधेयोव्यक्ते निषेधे च तिरोहिते गच्छ
गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्मम अत्र गच्छेति विधिर्व्यक्तः माणात्ति निषेधस्तिरोहितः कांतो देश्यदेशे
गमननिषेधो ६ निजजन्मप्रार्थनया स्वस्यामरणसंसूचनेन गर्भीकृतः यथा वा नचिरं मम तापाय तव यात्रा भविष्यति
यदि यास्यसि यातव्यमलमाशंकयापि ते अत्रापि न चिरं मम तापायेति स्वस्यामरणसंसूचनेन गमननि
षेधो गर्भितः आभासत्वे विरोधस्य विरोधाभास इष्यते विनापि तन्वि हारेण वक्षोजौ तव हारिणौ अत्र हारं हित्वा तन्नो ८
वपि हारिणौ इत्यापाततो निश्चये भ्रमूलको विरोधाभासः यथा वा प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्त
तोज्झिता अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत अत्र विरोधसमाधानोत्थे नाश्लि
ष्टो विरोधाभास इति पूर्वस्माद्भेदः विभावना विनापि स्यात् कारणं कार्यजन्म चेत् अप्यलाक्षारसासिक्तं

मित्रः सर्वैः — यायेद्गतः २ — ज्ञो ५ नलातः ३

कु० नं० तिच्चरणद्वयम् अत्र लाक्षारसावसेककारणाभावेपि रक्तिमाकाधितः स्वाभाविकत्वेन विरोधपरिहारः यथा वा ।
३२ अपीतक्षीबकादंबमसंमृष्टामलांबरम् अप्रसादितशुद्धांबुजगदासीन्मनोहरम् अत्र पानादिप्रसिद्धहेत्वभावे वि
32 क्षीबत्वादिनिबद्धं विभावनानाम् स्वसमयहेतुकत्वेन विरोधपरिहारः यथा वा वरतनुकवरीविधापि नासुरभिन
त्वेन नरेंद्रपातिना अपवित्रकुसुमापि वल्लरी समजनि वृंतनिलीनषट्पदा अत्र वल्लर्यां पुष्पाभावेपि भृंगा .
लिंगनं निबद्धं तत्र वरतनु . कवरीसंक्रांतसौरभनरपतिनखसंसर्गरूपे हेत्वंतरं विशेषणमुखेन दर्शि
लाण तमिति विरोधपरिहारः हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति म
न्मथः अत्र जगज्जये साध्ये हेतूनामसमग्रत्वं तीक्ष्णत्वादिगुणवैकल्यम् यथा वा उद्यानमारुतोद्धूतचूत
चंपकरेणवः उदस्रयंति पांथानामस्पृशंतो विलोचने अत्र बाष्पोद्गमनहेतूनां रेणूनामसमग्रत्वं स्पर्शन म
शे क्रियावैकल्यम् इमां विशेषोक्तिरितिदंडी व्याजहार यतः प्रथमोदाहरणे मन्मथस्य महिमातिशयस्त्वे द्वितीयो
दाहरणे चंपकरेणूनां मृदीपकत्वातिशयरूपश्च विशेषः ख्यापित इति अस्त्राभिन्नतीक्ष्णत्वादिवैकल्यम
पि कारणविशेषाभावरूपमिति विभावनादर्शिना कार्योत्पत्तिस्तृतीया स्यात्तस्यापि प्रतिबंधके नरेंद्रा राम
३२

नेवत्तेराजन्दशन्त्यपिभुजंगमाः अत्रनरेंद्राविषा। जैत्राः सर्पदंशप्रतिबंधकमंत्रौषधशालिनः श्लेषेणागृहीता
इतिसत्येवप्रतिबंधकेकार्योत्पत्तिः यथावा चित्रंतपतिराजेंद्र प्रतापतपनस्तव अनातपत्रमुत्सृज्यसातपत्रं
द्विषद्गणम् अकारणात्कार्यजन्मचतुर्थीस्याद्विभावना शंखाद्वीणानिनादोयमुदेतिमहदद्भुतम् तत्रशं।
खत्वेनकामिनीकंठेतंत्रीनादत्वेन तद्गीतेचाध्यवसीयते इत्यकारणात्कार्यजन्म यथावा तिलपुष्पात्स
मायातिबाणश्चंदनसौरभः इंदीवरेणचित्रंनिःसरंतिशिलीमुखाः विरुद्धात्कार्यसंपत्तिर्दृष्टाकाचिद्वि
भावना शीतांशुकिरणास्तन्विदहंतसंतापयंतिमाम् अत्रतापनिवर्तकतयातापविरुद्धैरिंदुकिरणैस्ता
पजनिरुक्ता यथावा उदितेकुमारस्यकुवलयमुत्तंसतिभातिनक्षत्रंसुकुन्तीभवेति चित्रंपराजकुमा
रपाणिपद्मानि यथावा अविवेकिकुचद्वंद्वंहंतुनामजगत्त्रयंश्रुतिपारणापिनोरक्ताणेएणांकजनमारणं
पूर्वोदाहरणयोः कार्यकारणविरोधित्वंस्वाभाविकमिहश्रुतिपारणापित्वस्वरूपागंतुकगुणाश्रयमिति।
भेदः कार्यात्कारणजन्मापिदृष्टाकाचिद्विभावना यशःपयोधिरभवत्करकल्पतरोस्तव यथावा जाता
लताहिशैलेजातुलतायांनजायतेशैलः संप्रतितद्विपरीतंकनकलतायांगिरिद्वयंजातम् कार्याज्ज

कु० नं० निर्विशेषोक्तिः । सति पुष्कलकारणे हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि । यथा वा अनुरागवती संध्या दिव
३३ सस्तत्पुरःसरः । अहो दैवगतिश्चित्रा तथापि न समागमः । असंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनम् । को वेद गो
33 पशिशुकः शैलमुत्पाटयेदिति । यथा वा अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितम
नोभिर्जलनिधिः । क एवं जानीते निजकरपुटीकोटरगतम् क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ।
विरुद्धं भिन्नदेशत्वं कार्य्यहेत्वोरसंगतिः । विषं जलधरैः पीतं मूर्छिताः पथिकाङ्गनाः । यः कार्य्यहेत्वो
र्भिन्नदेशत्वं विरुद्धं तयो सनिबध्यमानमसंगत्यलंकारः । यथा विषपानमूर्च्छनयो र्भिन्नदेशत्वम् य
था वा अहो खलभुजंगस्य विपरीतो वधक्रमः । अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते । क्वचिदसं
गत्यसमाधाननिबंधने न चारुताशयः । यथा अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयां श्वा
सान्स वर्षत्यपि कं पुनर्म्मध्यानान्नवत्वमपत्ता मवाप्य विरुद्धमिति विशेषः ॥ यत्र कार्य्यहेत्वोर्भिन्न
देशत्वं न विरुद्धम् तत्र नासंगतिः । यथा भ्रूचापवल्ली सुमुखी यावन्नयति वक्रतां तावत्कटाक्षविशिखैर्भि
द्यते हृदयं मम । अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च या । अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा । राम
अपारिजातां वसुधां चिकीर्षन्द्यां तथाकृथाः । गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्भेदं पुराकरोः । अत्र करुणं प्रति ३३

मे

शङ्कस्योपालंभवचने भुवि विकीर्षिततयास्यत्रकरणीयमपारिजातत्वं हि विकृतमित्येका संगतिः डाणित्राया

उद्यारे प्रवृत्तेन वराह रूपिणा तद्वितं गोत्रा एणं दंतं भ्राकुट्नैः कृतमिति हि पिधापिश्लेषो स्यापिनाय यथा वा (

त्वत्तवक्त्र खंडित सपत्न विला [redacted] सनीनां भूषाभवे त्यमि नवाभुवनैकवीर नेत्रेषु कंकणमयोरुषु

क पत्रवल्ली चोलेंद्रसिंहतिलकं पेटूलवेषु मोहं जगत्त्रय भुवामपनेतुमेतदाराय रूपमातिलेशवदेहभाजांनि:

सीमकां तिरसनीरधिनामुनैव मोहं प्रवर्धयसि मुग्धविलासिनीनाम् अत्रापोदाहरणे कंकणादीनामत्यत्र

कारणीयत्वं प्रासिद्धमितिनो पंन्यस्तम् भवति ना भावनारूपान्यत्र कनिरास्तिप्यतहति न तत्रानुगतिः वि

षमं वर्ण्यते यत्र घटनाननुरूपयोः केयं शिरीषमृदुंगी कतावत्मदनज्वरः अत्रातिमृदुत्वेनातिदुःसहत्वे

नातिदुःसहत्वे चानन्तरूपयोरंगनामदनज्वरयो र्घटना यथा वा अभिलषसि यदिंदो वक्त्रलक्ष्मीं मृगाक्ष्याः

पुनरपि सकृदब्धौ मज्ज संक्षालयांकं सुविमलमथ बिंबं पारिजातप्रसूनैः सुरभयवदनोच्चैरत्वं कृतस्यामु

खंक पूर्वत्र बलसती घटना अत्र चंद्रवदनलक्ष्याः ननकितापटनेति भेदः विरूपकार्यस्योत्पत्तिरपरं विषमं म

तम् । कीर्तिप्रसूते धवलां श्यामा तव कृपाणिका अत्र कारणगुणप्रक्रम रुद्धा तश्यामात धवलोत्पत्तिः कार्य

कारणयोर्निवर्त्यनिर्वर्त्त त्वेनपंचमी विभावना तत्र गुणशालित्वे त्वयं विषमइतिभेदः अनिष्टस्याप्यवा

त

कु० नं०
२५
34

मिश्रं तदिष्टार्थसंप्रयमात्र भक्ष्यप्राप्याहि मंजूषां दृष्ट्वा भुक्तिनमक्षितः इष्टार्थमुद्दिश्य किंचित्कर्मारब्धवतस्त
तोन केवलं मिष्टस्यानवाप्तिः किंतु तत्र एवानिष्टस्यापि प्रतिलंभश्चेत् तदपि विषमं यथा भक्ष्यप्रेप्सया सर्पपे(
टिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः किंतु स्वरूपहानिरपीति यथा वा गोपाल इति कृष्णत्वम
प्रभुस्त्रीरत्नं त्वया स्मितेनानृतेन तत्तीर्णमप्यन्तमप्यं त्वया कृतम् इदमप्यवाप्तिरूपेष्टार्थसमप्रयमादिष्टान
वाप्त्या वानिष्टप्रतिलंभे चोदाहरणम् अनर्थपरिहाररूपेष्टार्थस्य समा तत्रभयम् यथा दिवि श्रितवत्स्वं दं से
दिक्केयमपानुवि प्रशाश्यपदपतत्त्वं सोऽत्र पस्पततो भयं म आ न न केवलं प्रशास्य स्वार्थे नैव परिहारानवा
प्तिः किंतु स्वाश्रयस्याप्यनर्थावाप्तिरिति दर्शितम् पराणि षष्ठावाप्तिरूपेष्टार्थसमप्रयमात्रमुभयं यथा दि न स्पराव ण स्वतुभयं
पत्तन्मारुतेर्वालं तत्रादीप्यदृशाननः आत्मीयस्य पुरस्यैव सयोदहनमन्वभूत् पुरस्यैवेत्येव कारेण परा हतुमदहनरूपेष्टानव
निष्टप्रापणाभावो दर्शितः अनिष्टस्याप्यवाप्तिश्चेति श्लोके ऽति षष्ठावाप्तिरपि चशब्दसंगृहीतं यथा दृष्टान(त प्तिः स्वपुरदहनं च ७
म लाभिश्चेति प्रत्येकमपि विषं पदेनान्वयः तत्रश्च केवलानिष्टप्रतिलंभः केवलेष्टानवाप्तिश्चेत्यन्यदपि
विषमद्वयं लक्षितं भवति तत्र केवलानिष्टप्रातिलंभो यथा पश्चात्तपत्रएके सत्सीहृद्व्यस्य किं कंदर्प
पितृ मित्त्वसितावा पिकायां कालः कलिर्जगदिदं नकृतज्ञमस्ते । स्थित्वा हरिष्यति तनैव मृगस्यपनस्वीम राम
२५

अत्रपद्मानपत्रलिप्सया पद्मबीजावापं कुर्वत्यास्तल्लाभो ह्येव किंतु मुखशोभाहरणरूपो न्यकरातिशय प्रतिलं
भकेवतेष्टानवाप्तिर्यथा । विन्ध्यो निम्नंच शैलं निभृमो बध्नं सिंवदत्तु शैलिभुजः भयेगन वितत वाडवुणापेषु
घनहार्ययेजेति अत्र यद्यपि शैलस्य उपरितिन रूपानिष्टावाप्तिरपि प्रशस्ता । तथापि भवत्कर्णावुजसंस्पर्श ग
महिल्लासा नजातेति शैलधारणरूपेष्टानवाप्तिमात्रम् यथा वा लोके कलंकमपहातुमयं मृगांको जातो मुखेन्त
वधुनत्ति लग्नहूलेन तत्रापि कल्पयति तान्विकलंककरे रंगानार्थ्यः समाश्रितजनं हि कलंकयंति अत्रानर्थपरिहार
पेष्टानवाप्तिः यथा वा शापोप्यदृष्टतनयानन पद्मशोभे सानुग्रहो भावतामपि पातित्तो यं कृष्णांदृहलाविखतुमि तृति
द० धनैषी बीजप्ररोहजन नीहँनः करोति अत्रपरानिष्टप्राप्तिरूपेष्टानवाप्तिः स्वतोनिष्टस्यापि मुनिशापस्यम
हाफलपार्थ्यपुत्रलाभावश्यंभावगर्भतयादशरथे नेष्टत्वेनाङ्गीकृतत्वात् यत्र केवचित्त्वेवसत्त्विष्यर्थप्रवित्तेनान्येन (न
न४नियोक्तृतिष्टमेवेस्पत्वेषमेवसाध्यते तत्रापीष्टानवाप्तिरूपं विषमं यथा तेप्रतिप्रेषिता दूतीति तस्मिन्नेव लयं गता
सख्यः पश्यतमो ज्यं मेविपाकं वाविधेरमुं तस्मिन्नेवलयं गतेति दूत्यानायकेस्वाच्छंद्यं दर्शितम् यथा वा नपुंसकमिति
ज्ञात्वा प्रियायै प्रेषितं मनः तत्तु तत्रैव रमते हताः पाणिनिनावयम् एतानि सर्वविधेष्टानवाप्त्युदाहरणानि किंचि
दिष्टावाप्ति पूर्वकं तदनवाप्तिर्यथा यथा मदीयेवरदराजस्तवे भान्ति निग्रामसु भवदंघ्रि समपूर्वशोभालोभात्स

कु०नं० किरणोत्करे पि

ताप्यकिरणोत्करमाप्रभातं तं श्रोद्धते हुतवहातनाणुमरागोत्तापं भजत्यनुदिनं सहिमं दत्तापः यथावा त्वद्वक्र
३५ कांतिमयमंबुजकोशमुद्रां मंगात्ततस्तु भुवनमित्रकरोपलब्ध्या लब्धावपर्वणि विधुः क्रमहीयमानः शंसत्यनी
35 त्युपक्षितां श्रियमाश्रुनाशाम अत्र यश्लोके सूर्यकिरणानां रात्रिघ्नानो प्रवेशानमागंतुमित्युक्तम सूर्यस्य
निजकिरणेषु भगवंतश्चरणान्हणिम प्रेसयो तत्कुतं तेषामौनौ प्रत्तापनं परिकल्प्यते घामुदयकालहूप
महाणिमानंच तज्ञोद्धजनाराघानामिव अनिसंतापनप्रयुक्तारुणिमानुवृत्तिं परिकल्प्य सूर्यस्य महतापि
यत्नेन तात्कालिकेषावाप्तिरेवजायते न सार्वकालिकेषावाप्तिरिति दर्शितम द्वितीयश्लोके चंद्रस्य
भगवन्मुखलक्ष्मीमीप्समानस्य सुहृत्वेन मित्रघाद्वयस्य लेशवशात्सूर्यं परिकल्प्य तत्किरणस्य कमलमुक
लविकाशकस्य चंद्रानप्रवेशं च सुहृत्पाणिर्भगवन्मुखलक्ष्मी[illegible]निधान गृहकोशमुद्रामोचनपूर्वकं तत्ता
गृहीतभगवन्मुखलक्ष्मीकस्य तया भगवन्मुखलक्ष्म्या चंद्रमसादनार्थं चंद्रस्पर्शरूपं च परिकल्प्यते एतावतापि
प्रयत्नेन पौर्णमास्यामेव भगवन्मुखसाम्यरूपे घावाप्तिर्जायते न सार्वकालिकीति दर्शितम क्वचिदिघानवा राम
३५

प्रावपि तद्वा प्तिभ्रम निबंधनविच्छित्तिविशेषो यथा वल्लालक्षोणिपाल त्वद्दहितनगरे संचरंती किराती ।
कीर्णान्याधाय रत्नान्युरुतरखदिरांगारशंकाकुलांगी क्षिप्त्वा श्रीखंडखंडं तदुपरि मुकुलीभूतनेत्रा धमंती ।
श्वासामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकां करोति अत्र प्रभ्रांतिसंपादनो योगात तत्संपादकतालाभेपित
त्वाभ्रमो धूमभ्रमो पत्यासेन निबद्धः समंस्या द्वर्णनं यत्र द्वयो रप्यनुरूपयोः स्वानुरूपं का तं स परिहारो अत्रनूपद्य सत्वेपः तत्रह
एकुचमंडलम प्रथमविषमप्रतिद्वंद्वी दं सममम यथा वा कौमुदी वत्तुहिनांशुमंडले जान्हवी वशापि
खेडमंडनम पद्मपकीर्तिरनुरूपमाश्रिता त्वां विभाति नरहिंसभूपते यथा वा चित्रे चित्रे वनजन ।
महाचित्रमेतद्विचित्रम् जातो दैवादुचितपटना संविधाता विधाता यन्निंबानां परिणतफलस्फू
तिरास्वादनीया यच्चैतस्याः कवलनकला कोविदः काकलोकः पूर्वमुक्तिपर्यवसायि इदं तिं दापर्यवसा
यीति भेदः साहूप्यमपि कार्यस्य कारणेन समं विदुः नीचप्रवणता लक्ष्मी जलजायास्तवोचिता इदं
द्वितीय विषमं प्रति द्वंद्वि समं यथा वा आदौ हालाहलं दवदहनादुत्पन्नो धूमो घनतामुपेत्य वर्षेत्व
म यच्च्वमपाति तद्युक्तं सोपिद्वमे विनिहंति यथा वा आदौ हालाहलं हुलभुज्जा दत्तहल्लावतंबो वात्ये

शंभोर्निटिलमहसा वह्निमैत्री निरूढः प्रोढो राहोरपि मुखविधैरंतरंगीकृतो यः सोयं चंद्रस्तपति किरणैर्मामिति प्रा
समेतत पूर्वत्र कारणस्वभावात् तद्रूप्यम अत्र त्वागंतुकतदीयदुष्टसंसर्गात्तद्रूप्यमिति भेदः विनानिबंधनत्वसिद्धि
र्यदर्थः कर्तृरूपम एको वा रत्नलाभोयं स्याल्लोभे वारणोर्थिनः इदं समम निबद्धस्यावाप्तिश्चेत्पर्य्यपर्यसंगृहीतस्य
त्रिविधस्यापि विषमस्य प्रतिद्वंद्वी प्रावाप्तिः अनिष्टस्याप्रसंगार्थे अत्र राजार्थितया राजानमनुसरंतं द्वारि
दौवारिकैर्वार्यमाणं प्रति नर्मवचनमुदाहरणम् नचात्र निवारणमनिष्टमापन्नमित्यनुदाहरणत्वमाशंकनी
यम् राजद्वारि सततं निवारणं संभावितमिति तदंगीकृत्य प्रवृत्तस्याविषमालंकारोदाहरणत्वं चिवा तर्कितोत्करानि
रूपस्याभावात् किं चात्रोत्करानि यस त्वेपि श्लेष महिम्ना इष्टार्थप्राप्तिस्तत्रापि समालंकारोपि प्रतिहत एव उद्वेग
व जैरटनमर्च्यमानएं त्वामाश्रयाल्लिह विण्डवि लोरस्मि राजनू उच्चाटनं त्वमपि लेभयसे तमे वमामयनेव विफलामह
तोसेवा अत्र माजनतो यथपि [illegible] तुल्या तिं पाभिव्यक्ति कस्यापां विषमालंकारजपापि प्राप्तमिकतु
तिरूपवाच्यक स्यापां समालंकारोननिवार्य्यते एवमपि प्राप्यावाप्ति सत्वेपि यत्र श्लेषवशादसतोनिष्टार्थस्य प्रती
तिस्तत्रापि समालंकारस्यन क्षतिः यथा श्लाघ्यं नावनुकर्तव्य मिति पित्रासमीरितः तद्वैवशास्त्रं कृतवान्पितृरामा
ननेपिता अत्र पितृराज्ञानंपितेत्यत्र तेन विरोधालंकाराभिव्यक्तापर्यं तरवाल्वित्यत्रपदद्वयविभागान्नौरूपोतास्या क
ते

राम
५

गत
पि विवक्षायाः सत्त्वेपि नावेगुनात्तीति तत्र त्वित्येक पदत्वेन वस्तुसद्भ्यैत्तिरमोदाय समाहतेकाप्युपत्येव इति वस्तथा
सद्भिष्टा वापि प्रतीतिमात्रेणाधिरहितत्वमुदाहरणम् यथा सत्यं तप स्तुगत्ये यत्नभावु भराविप्रतीतेसत्र अनुभवतिसुग
बं समुन्नतिम यथा वा महिनाम्भिं तेलवदनं विमलयतिजगंति देवकीर्तिस्ते मित्राह्लादं कर्त्तं मित्रायपुदुस
तिमतापोपि अधिकं पुष्कलाधारादाधेयाधिक्यवर्णनम् ब्रह्मांनि जलेयत्र तत्रमांतिन तेगुणाः अत्र यत्रमहा ३
जनौघे नेतानिब्रह्मांडानि भुवनेदपमानानीत्याधारस्याल्पत्वं प्रदर्श्य तत्र न मांतीत्याधेयानां गुणानां
माधिक्यं वर्णितं यथा वा युगान्तकालप्रतिसंहृतात्मनो जगंति यस्यां सविकासमासत तनौ ममुस्तत्रन कैटभद्विषस्त
पोधनाभ्यागमसंभवा मुदः पूर्वमाधेयापेक्षया पदाधारापि क्वं तदपि तत्रतानम कियद्भुवनत्रये ते विश्राम्येति गुणा
स्तव अन्तः इति प्रत्यस्त इष्यमहावेभवत्वेनोक्तानां गुणानां विश्राम्येतीत्यसंबाधावस्थानोत्तया आधारस्य वा
ग ब्रह्मणः आधिक्यवर्णितम् यथा वा अहो विशालं भूपालभुवनत्रितयोदरम् माति मातुमशक्योपि यशो राशि
र्यदत्रेति अत्र ययणुदाहरणेपूर्वेपि किंमहद्वा नूनं ब्रह्मांडे विशालमितित्वाधारयोः प्रशंसाक्षिपते तथापि तनुत्वे
वत नसिद्धैकत यो: पूर्वोदब्रह्मभुवनोदरयो गुणयशोराश्याधिकारणत्वेनाधिक्यं कल्पितत्वेव प्रशंसाक्षिपते इति तत्र

प२ णि

कु० न० शंसा प्रस्तुतगुणपक्षो राशि प्रशंसायामेव पर्यवस्यति अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता मतिमालोर्मिकाते यक
माणि रेजैंवटायते अत्रैमालोर्मिकाताव दंगुलिपरिंतत्वात सूक्ष्मा साऽपि विरहिण्याकरे कंकणवत्प्रवेशिता तस्मिन्य मानाव
३२ ल्लंबत इत्युक्ता ततोऽपि करस्य विरहकार्श्यादतिसूक्ष्मता दर्शिता यथा वा यन्मध्यदेशादपि ते सूक्ष्मं लोला द्विह
37 श्यते मृणालसूत्रमपि ते नैव माति स्तनांतरे अन्योन्यं नाम यत्र स्यादुपकारः परस्परं त्रियामा शशिना भाति शशी (
भाति त्रियामया यथा वा यथोर्ध्वाक्षः पिबत्यंबु पथिको विरलांगुलिः तथा प्रपापालिकापि धारां वितनुते तनुम् (
अत्र प्रपापालिकायाः पथिकेन स्वाभिलाषात्पानीयदानव्याजेन बहुकालं स्वमुखावलोकनमभिलषंत्या विरलांगु
लिकांजलिकरणात्पानीयपानानुवृत्तिसंपादनेनोपकारः कृतः तथा प्रपापालिका या पि स्वमुखावलोकनमभि पा
त लषतः पथिकस्य धारातनूकरणेन चिरं पानीयदानानुवृत्तिसंपादनेनोपकारः कृतः अत्रोभयोर्व्यापाराभ्यां स्वस्वो
पकारसद्भावेऽपि परस्परोपकारो न निर्वर्त्यते विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् गतेऽपि सूर्ये दीपस्थास्तमः छि
दंति तत्करः यथा वा कमलमनंभसि कमले च कुवलये तानि च कनकलतिकायां सापि सुकुमारसुभगेत्युत्पात
घे परंपरा केयम् अत्र सूर्यस्य प्रसिद्धाधारस्याभावेऽपि कमलकुवलययोरन्यत्राप्यवस्थितिरुक्ता क्वचित्प्रसिद्धाधाररहिता (
नामाधारांतरनिर्देशं विनैवानन्यमवस्थितिर्वर्णिता यथा दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ३
तत्करणमन्यत्रास्थितिरुक्ता द्वितीये सलिलस्य प्रसिद्धाधारस्याभावेऽपि २

रमयंति जगंति गिरः कथमिव कवयो न ते वंद्याः ॥ अत्र कवीनामभावेपि तद्गिरामाधारनिर्देशं विनैवावस्थितिरुक्ता वि-
शेषस्सोपि यदेकं वस्त्वनेकत्र वर्ण्यते ॥ अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे ॥ यथा वा कुटयोन्यापपातोसि
दिक्षु सर्वासु दृश्यसे ॥ वत्स त्वमग्रतो सीतेः संतापेनानुमीयसे ॥ किंचिदारंभतोऽशक्यवस्त्वंतरकृतिश्चापरः ॥ वोपदृश्य तारंयया
तथ्यं कल्पवृक्षतरिटिदाणम ॥ यथा वा स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम विधिना ससृजेन
वो मनोभूर्विसृष्टं स्वाधीता वृहस्पतिश्च ॥ अत्राद्ये राजदर्शनारंभेण कल्पवृक्षदर्शनरूपाशक्यवस्त्वंतरकृतिः ॥ द्विती-
ये राजसृष्ट्यारंभेण मनोभवादिसृष्टिरूपाशक्यवस्त्वंतरकृतिः ॥ स्याघातापातोन्यथाकारि तथाकारि क्रियेत चेत् ॥ येर्ज-
गन्नीयन्तेहे ते तैरेव कुसुमायुधः ॥ यथा साधनत्वेन तो कृतोवस्तु तत्केनचित्तद्विरुद्धसाधकं क्रियेत चेत् स ... व्याघा-

यथा साधनतया केनचिदुपात्तं तत्तदन्यतस्तद्विरुद्धसाधनं क्रियेत चेत्तदा व्याघातः ॥

तः ॥ तत्राद्य उदाहृतः ॥ द्वितीयो यथा दृशा दग्धं मनसिजं जीवयंति दृशैव याः ॥ विरूपाक्षस्य जयिनीस्तां स्तुवे वामलोचनाः ॥
लोककर्तृणाति वस्त्वापि क्रियाकार्यविरोधिनी ॥ द्याचेद्यानरतिम यपरित्याग्यरावते कार्यविशेषविशेषादकतया केनचि-
त्संभाव्यमानार्थादन्येन कार्यविरोधिनी क्रिया सो कर्यते तदा सोपि व्याघातः ॥ कार्यविरुद्धक्रियायां लोककर्तृका-
रणस्य मतं तां तदावेणम ॥ जैत्रपात्रोमुविना रज्ञा युवराजस्य राज्य एव स्थापने यत्कातरत्वेन संभावितम् बालत्वं

गु यथा ते ने

जु वोनावि संस्पर्शं ज

प्रस्तुतनन्दिहृदस्य सहृनयनस्पैकारणेन पाण्डुवपाजेपीत्यागस्पापुकत्वमदर्शि यत्तासमर्थ्यत्तेपच्याद्वा जु वोनावि संस्पर्शं ज

कु०नं० नपेदादिद्रुशंकया दातापिविसृजत्पर्थं तथैवनन्तुशंकया अत्रपूर्वोत्तरार्द्धे पदपति पदाद्रूपयोर्द्वचने इति लक्षणानुगतिः

२८ गुंफः कारणमाला स्पा यथा प्राक्प्रांतकारतौ: नयेनश्रीः श्रिया त्यागस्त्यागेन विद्युते यशः उत्तरोत्तरकारणभूतपूर्वपू

38 र्वैः पूर्वपूर्वकारणभूतो त्तरोत्तरैर्वावस्तुभिः कृतो गुंफः कारणमाला अत्रायोहत्न छितीयो यथा भवंति नरकायां

पात पायं दादिघ्र सेभुवम दादि धमप्रदानेन तस्मादानपाो भवेत गृहीतमुक्तरीत्यार्थश्रेणिरेकावलीमता नेत्रेकर्णा

न्तविश्रांते कर्तोतोतम दोलिनौ दोस्तंभौ जानुपर्यन्त प्रलंबनमनोहरौ जानुनीरत्नमुकुराकारे त्स्य हि भूभुजः उत्त

रोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषणमावा गृहीतमुक्तरीतिः तत्राप्रकारेदाहृतः द्विती नेत्रनासामपांगितेयोनिरभूत प्रपाम

योयथा दिक्कालात्मसमैव यस्यविभुता यस्तत्र विद्योतते यत्रामुष्यमुपैति भवति किरणारात्रो: सयासामभूत यस्ते न

उ पितमुखः पोष्यहविषे यत्तस्य जीवातवे वोढापंकजानामेष मन्मथरिपोस्ता:पातु वो मूर्तयः दीपकैकावलीयोगात् दृष्टिमिति पयूनं

मालादीपकमिष्यते स्मरेणहृदये तस्याः स्त्रैनत्वयिकृता स्थितिः अत्राश्रितिः तितितिपदमेकं स्मरेणानस्याहृदयेस्थितिः रूप

त कृता तेनैस्याहृदये नत्वयिस्थितिः कृतेत्येवं वाक्यहृयान्वयः अतोदीपकं गृहीतमुक्तरीति सद्भावादेकावलीचे २९

प्रीतेः २ यजमानः २ वाधः २

विशेषणत्वात् भावा

तिदीपकैककारकदीपोगः यथा । संग्रामाङ्गणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादि
तम् कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् अत्र येन येन सहसा यद्य
त्समासादितमिति तिसंबन्धे पदवाक्यस्थितमेकं समासादितपदं कोदण्डेन शरा इत्यादिषु बहुषु विवरणवाक्येषु तदुचितलिङ्ग
वचनपरिणामेनान्वेतीति दीपकम् शरादीनामुत्तरोत्तरविशेषणत्वाद्वा देकावलीयोगः । उत्तरोत्तरोत्कर्षः सारम् यथाभिपीव
यते मधु मधुनस्तस्मात्सुधा तस्याः कवेर्वचः यथा वा । अन्तर्विस्मितं त्रिलोकी निवसति फणिनामीश्वरो सोऽपि शेते सिन्धोः
सोऽप्येकदेशे तमपि चुलुकयाञ्चकार कुम्भयोनिः स्वकान्ते खद्योततुल्यो नभसि श्रीनृसिंह क्षितीन्दो त्वत्कीर्तेः कर्ण
नीलोत्पलमिदमपि च प्रेक्षणीयं विभाति अपरस्यापकृष्टोत्कर्षः अपरस्यापकृष्टोत्कर्षो यथा तरणेरल्पप्रतापरू
लस्तूलादपि च याचकः वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति उभयपक्षे यथा गिरिर्महान् गिरेरब्धिर्महान्
अब्धेर्नभो महत् नभसोऽपि महद्ब्रह्म ततोऽप्याशास्ति पश्चात् अत्र ब्रह्मपर्यन्तमहत्त्वे परस्यापकृष्टत्वः प्रकृतात्वा शा
यामपरस्यापकृष्टत्वः यथा वा शालं किं प्रपन्नानि विपन्नान्यपि ते किमन्न तत्यजं तेन प्रत्यपन्ते कृपणेन धनानि यत
अप्येकमपि कालं कारं केचिद्व्यवहृतुः पर्याययोपदिर्पर्याये लोकस्यानेकसंश्रयः पर्याय मुक्ताः गता चन्द्रकान्ति
नीवदनप्रभा अनेकरूपाः कामिनीवदनप्रभायाः क्रमेण पद्मचन्द्रस्वरूपानेकाधारसंश्रयणं पर्यायः पर्यायविष
िा यत्तेऽपत्यं केऽतो नो कं तथा यः कृतिपरित्यागो तया प्राक्संश्रयणापदेशेन पर्यायपरिवाहः अत एव क्रो
यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय ॥

कु॰ नं॰ ३२ 39

एवंधत्स्यजातिनतुतां म सेवते मय्यभावाः पक्ष्मो मुक्तास्तरलगतयः संश्रितालोचनाभ्याम् पतेवस्तः कुचस
चिवनामद्दिनीयेचव केत्वज्ञात्राणेण ए विनिमयः कल्पितोयौवनेन इत्यत्रपर्य्यायः कृत्स्नप्रकाशकारअजहार
सर्वत्रशावृत्पर्य्यायो यथा न चाश्रयान्वितिप्रियं तवकालकूटके नो तलोतरतिशिवं पदेपतिष्ठा प्राणाविवस्यहृदये विशेष
वृषलस्मणोक्य केंद्रेधुना वसतिवा विधनःखलानां सर्वोप्यपर्यायरूपपर्य्यायः संकोचपर्य्यायो यथा प्राप्यसूर्वा त्वा
वसुधामशोभां पापा विश्राम्य ततस्तरूणाम् प्रोषितंगते सप्रतितिरमभानो शोत्स्येशाने रन्तरपामयास्तीत अत्र
शोत्स्यस्योत्तरोत्तरमाधारसंकोचात्संकोचपर्य्यायः विकाशपर्य्यायो यथा विबोधरत्वागलेतान्विपूर्वमिदंस्पत
अधुनाम्णसावास्ति हृदये प्येच दृश्यते अत्राणस्यपूर्वाधारापरित्यागेनाधारान्तरसंक्रमणमितिविका
शपर्य्यायः एकस्मिन्नप्यनेकेवा पर्यायः सोपि संमतः अधुनापुत्रिनेतत्रयत्र त्रोतः पुराजानि यथा वा (त॰
तथाभूदस्माकं प्रथममविभिन्ना तनुरियम् ततोनुत्वं प्रेष्या त्वयमपि हताशां प्रियतमाः इदानीं नाथस्त्वं वयमपि कलत्रं कि
मपरं हतानां प्राणानां कुलिशकठिनानां फलमिदम् अत्रदंपत्योः प्रथममभेद स्ततः प्रेयसीप्रियतमभावः ततो
भार्य्यापतिभाव इत्याधेयपर्य्यायः परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः जग्राहैकं शरं मुक्त्वा कटाक्षात्सरिपुश्रियम्
यथा वा तस्य च प्रवयसो जरातुषः स्वामिनः किमवशोच्यते पुनर्येन जर्जरकलेवरव्ययात् क्रीतमिंदुकरणोज्ज्वलं यशः
परिसंख्यानिषेधैकमेकस्मिन्वस्तुयन्त्रणम् स्नेहस्तयः प्रदीपेषु नस्वांतेषु नतभ्रुवाम् यथा वा विलंघयंति स्मृतिवर्त्मय राम

अन्यत्रनियमनम् ३२

तार्थ्यम

ला स्यांली वृतीनां न यनोत्पलानि विभर्त्ति यस्यामपि वक्रिमाणमेको महाकालजटार्द्धचंद्रः अत्रायोदाहरणे निक्षेपः शाब्दः द्विती
ये त्वार्थः विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता सः यथा शिरांसि चापान्वानमयंतु महीभुजः अत्र संधिविग्रहप्रमाणप्राप्तयोः
शिरश्चापनमनयोर्युगपदुपस्थितयोर्युगपत्कर्तुमशक्यत्वाद्विकल्पः यथा वा पतत्यविरतं वारि नृत्यंति च कलापिनः अद्य
कांतः कृतांतो वा दुःखस्यांतं करिष्यति प्रियसमागमश्चेन्न मरणमाशंसनीयम् मरणेन तु न प्रियसमागमसंभव इति तयो
राशंसायां विकल्पः बहूनां युगपद्भावभाजां गुंफः समुच्चयः नश्यंति पश्चात्पश्यंति भ्रश्यंति च भवद्विषः अपि तेषे न संभा
विनयोगपद्यानां समुच्चयः यथा वा विश्राणाहृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं यद्विदधाति सा विधुरिता साधो रहिता
तदाकर्ण्यतां शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेंखति भ्राम्यत्युल्लुठति प्रणश्यति गलत्युन्मूर्छति त्रुट्यति
अत्र कासांचित्क्रियाणां किंचित्कालभेदसंभवेपि शतपत्रपत्रशतभेदन्यायेन योगपद्यं विरहातिशयद्योत।
नाय विवक्षितमिति लक्षणं तु गतिः अहं प्रथमिकाभाजामेककार्यान्वयेपि सः कुलं रूपं वयो विद्या धनं च मद २४
दयंत्यमम यत्रैकः कार्यसिद्धिहेतुत्वेन प्रक्रांतस्तत्रान्येपि यदहमहमिकया खलेकपोतन्यायेन तत्सिद्धिं कुर्वंति सोपि तस्यापेनतप
समुच्चयः यथा मदेश्वामिजित्समेकं समग्रं कारणं तद्धदेवरूपादिकमपि तत्साधनत्वेनावतरति यथा वा प्र
दानं प्रच्छन्नं गृहमुपगते संभ्रमविधिर्निरुत्सेको लक्ष्म्या मनभिभवगंधाः परकथाः प्रियं कृत्वा मौनं सदसि क
थनं चाप्युपकृते श्रुतेत्यंतासक्तिः पुरुषमभिजातं प्रथयति क्रमिकैकगतानां तु गुंफः कारकदीपकम् गच्छ
त्यागच्छति पुनः पांथः पश्यति पश्यति यथा वा निद्राति स्नाति भुंक्ते चलति कचभरान् शोषयत्यंतरास्ते दीव्य

कु० नं० त्यदैत्यैर्नचायं गदितुमवसरो भूय आयाहि याहि इत्युदन्तैः प्रभूणामसकृदधिकृते वारितान्द्वारि दीनान् यथया स्मा
८० नाळीकन्ये सरति रुह रुचामंतरंगे रथांगैः आद्योदाहरणेऽत्र तस्य कर्तृकारकस्य गमनादिष्वन्वयः द्वितीये
त्वध्याहृतस्य प्रभोः कर्तृकारकस्यैकस्य निद्रादिष्वन्वय इत्येकस्यानेकवाक्यान्वये न दीपकत्वापत्त्या
40 कारकदीपकं प्रथमसमुच्चयप्रतिद्वंद्वीदम् समाधिः कार्य्यसौकर्य्यं कारणांतरसंनिधेः उत्कंठिता च तरु
णी जगाम मासं च भानुमान् यथा वा मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः उपकाराय दिष्ट्येदमुदी
र्णं घनगर्जितम् केनचित्कारणेन तस्य कार्य्यस्य कारणांतरसंनिधानात् सौकर्य्यं तत्समाधा
नात्समाधिः द्वितीयसमुच्चयप्रतिद्वंद्वी अयं समाधिः तत्र बहूनां मन्येकं समर्थानां खले कपोतन्या
येन युगपत्कार्य्यसाधनार्थं भवनात् अत्र खलेकेन कार्य्यसमाप्तिसिते अन्यस्य काकतालीयन्या
म येनापतितस्य तत्सौकर्य्याधायकत्वमात्रेणात्रोदाहरणे उत्कंठिते त्युत्कंठैव प्रियाभिसरणे पुष्कल
कारणं तत्पं कारणांतरमपेक्षते अस्तारूढे हि नाभिरामकालत्सौ मनोभव इति न्यायात् दैवादापत
तास्त्वं पकारेण तत्सौकर्य्यमात्रमिति एवं द्वितीयोदाहरणेपि योज्यम् प्रत्यनीकं बलवतः प्रांशोः पक्षे प
राक्रमः जैत्रनेत्रानुगौ कर्णौ भुत्पलाभ्यामधःकृतौ यथा वा मम कीर्तिरूपमहरद्भुवि यलरत्नप्रवि ए
सेः

ष हृदयेयमितित्वयि मत्सरादिव निस्तदयः प्रहर्तुं लिप्सेति विलुतां मदनः एवं वलवति प्रतिपक्षे प्रतिकर्तुमश
क्यनदी यवाध नं प्रत्यनीकमिति तिष्ठते सा ता त्मति पक्षे पराक्रमः प्रत्यनीकमिति कैमुत्तिकन्यायेन
फलति यथा मधुव्रतौघः कुपितः स्वकीयमधुप्रभा तत्र तिमीलनेन विंवं समाक्रम्य वलात्तु भोक्ष्यो:
कलेकमकेऽधुवमातनोति कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते सजितस्त्वं त्रिलोकेन्दुः कावा
तीसतसी रुहाम अत्र सहस्त्यनेन येन जितानीति विवक्षितम् तथाच सोपि येन जितस्तानि पद्मा
निर्जितानीति किमुवक्तव्यमिति दंडापूपिकान्यायेन पराजयरूपस्यार्थस्य संसिद्धिः काव्यार्था
पत्तिः तां त्रिकाभिमतार्थापत्तिव्यावर्तनाय काव्यविशेषणम् यथा वाऽधरोपमस्पीतरस्या वंधुजी
वप्रभा हर्स अन्यजीवप्रभां हन्त हन्तीति किमद्भुतम् स्वकीयहृदयं भित्वा निर्गतौ पयोधरौ कृदय तौ
स्यान्यदीयस्य भेदने का कृपा तयोः समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं जितोसि मंदकेद
र्पमच्चित्तोसि त्रिलोचनः अत्र के दर्पजयोपन्यासलक्षणषष्ठकरविषयत्वात्समर्थनसापेक्षस्य मच्चि
त्तोसि त्रिलोचनः इति स्वोत्कः कर्तोपि वसान्निध्यानप्रदर्शनेनव्याप्तिपरतादि सापेक्षत्वेन यौगिकलिं समर्थनेकाव्यलि
गम १

दंडाकर्षतोतद्वलं विनामपूपानामाकर्षणमर्थसिद्धं तदितरार्थः ६
दुष्करस्रूपत्वात् २

कं०नं· गव्यावर्तनाय काव्यविशेषणम् इदं वाक्यार्थहेतुकं काव्यलिंगम् पदार्थहेतुकं यथा भस्मोद्धूलनभद्रमस्तु भवते रुद्राक्षमा
८२ ले शुभे हा सोपानपरंपरे गिरिसुताकांतालयालंकृते अद्याराधनतोषितेन विभुना युष्मत्सपर्य्यासुखालोकोच्छेदिनि मोक्ष
नामनि महामोहे निधीयामहे अत्र मोक्षस्य महामोहत्वमप्रसिद्धमिति तत्समर्थने सुखालोकोच्छेदिनि इति पदार्थो हेतुः
५१ क्वचित्पदार्थवाक्यार्थौ परस्परापेक्षौ हेतुभावं भजतः यथा चिकुरप्रकरा जयंति ते विदुषी मूर्द्धनि सा विभर्ति यान् प
शुनाप्यपुरस्कृतेन तत्तुलनामिच्छति चामरेण कः अत्र चामरस्य दमयंतीकुंतलभारसाम्याभावे विदुषीमूर्द्धनि
यान् विभर्तीति वाक्यार्थः पशुनाप्यपुरस्कृतेनेति पदार्थश्चेत्युभयं मिलितं हेतुः क्वचित्समर्थनीयार्थसमर्थना
र्थं वाक्यार्थपदार्थौ हेतुः यथा वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न कापि क्वचिदपि भवंतं प्रणतवा
न् नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिमानितीश क्षंतव्यं तदिदमपराधद्वयमपि अत्र तावदपराधद्वयमपि
समर्थनीयमस्य वाक्यार्थत्वात् तत्समर्थनं च पूर्वापरजन्मनोरनमनाभ्यां वाक्यार्थभूताभ्यां क्रियते अत्र द्विती
यवाक्यार्थे तनुत्वमेकपदार्थो हेतुः अत्रापि संप्रतिनमन्मुक्त इति वाक्यार्थो वा हेतुः क्वचित्परस्परविरु
द्धयोः समर्थनीययोरुभयोः क्रमादुभौ हेतुभावं भजतः यथा असोढा तत्कालोल्लसदसहभावस्य तपसः कथा
नां विस्रंभेष्वपि च रसिकः शैलदुहितुः प्रमोदं वो दिश्यात्कपटवटुवेशापनयने त्वराशैथिल्याभ्यां युगपदभि
युक्तः स्मरहरः अत्र शिवस्य युगपत्कृत्रिमब्रह्मचर्यापनयनत्वरातदनुवर्तनेच्छयोर्विरुद्धयोः क्रमाद्गि
रिजातीव्रतपसोऽसहिष्णुत्वम् तत्संलापकौतुकंचेति उभावर्थौ हेतुत्वेन निबद्धौ क्वचित्परस्परविरुद्धयोः राम
८१

रुभयोः समर्थनीययोरेक एव हेतुः यथा जीयादंबुधितनयाधरसमास्वादयन्मुरारी रयम अंबुधिमथ्यनक्लेशे कल
यन्विफलं च सफलं च अत्र विफलत्वसफलत्वकलनयो विरुद्धयोरेक एवांबुधितनयाधरसास्वादोहेतुः इदं काव्य
लिंगं हेत्वलंकार इति केचित्प्रवजर्दुः हेगोदावरिदेवितावकतटोद्देशे कलिंगाः कविर्वाग्देवी बहुदेशदर्शनसंवीत्यत्त्वा
विरक्तिं गतः एनामर्णवमप्यपसुमसुर जिल्ला भीसरोजासनं व्रह्मा लंगमयाहितो कथमसावेका किं नीष्यास्यत्री स्यत्रत्र
लक्षणः प्राप्यणं कथं गोदावर्याः कर्तव्यमित्यसंभावनीयार्थोपपादकस्यार्णवमध्ये त्यादित्त द्विशेषणस्यास्य सनं श्लेषा (व्योग्
रकार्पर्द णइतिश्लेषोऽविघटमानार्थस्यवर्णनमिति श्लेषलक्षणमिति च जयदेवेनोक्तम् वस्तुतस्तु त्रापि पदार्थहेतुकं काव्य(
लिंगमेव तत्तभेदकाभावात् ननु साभिप्रायपदार्थवाक्यार्थविन्यसनरूपात्परिकरात्काव्यलिंगस्य किं भेदकम् उच्य
च्यते परिकरे पदार्थवाक्यार्थवा प्रतीयमानोऽर्थो वाच्योपकारकत्वं भजते काव्यलिंगे तु पदार्थवाक्यार्थ एव
हेतुभावं भजतः" तथापि पशुनाप्यपुरस्कृतेनेति पदार्थहेतुकोदाहरणे मच्चित्ते त्रिलोचन इति वाक्यार्थहेतुको
दाहरणे च प्रतीयमानार्थस्यापि हेतुकोटयनुप्रवेशो लक्ष्यते पशुनेह विवेकित्वाभिप्रायगर्भ विदुषी तस्य प्रति
निर्देशत्वात् त्रिलोचनशतीकं दर्पदाहकत्तृतीयलोचनत्वाभिप्रायगर्भकंदर्पजियोपयोगित्वात्तस्य सत्यं तथापि
न तयोः परिकर एव किंतु तदुभयापि तं काव्यलिंगमपि प्रतीयमानाविवेकविशिष्टेन पशुनाप्यपुरस्कृतत्वस्यानेक
नन्वयद्यपि सुखालोकोक्तं हि नीत्यादिपदार्थहेतुककाव्यलिंगोदाहरणेः ग्रेप्यनति मान इत्यादि वाक्यार्थहेतुक

कु०नं० ५२ पदार्थस्य प्रतीयमानं कंदर्पदाहकतृतीयलोचनविशिष्टस्य शिवस्य चित्ते सन्निधानस्य वाक्यार्थस्य च वाच्यस्यैव हेतुभावात् न हि
तयोर्वाच्ययोर्हेतुभावे ताभ्यां प्रतीयमानेन मध्ये किंचित् द्वारमस्ति यथा सर्वाशुचिनिधानस्येत्यादिपदार्थपरिकरोदाहरणे स
र्वाशुचिनिधानत्वादिनाऽनेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वं यथा च वाक्यार्थपरिकरोदाहरणे पर्य्या
योक्तविपर्यासतत्वा वाक्यार्थेन प्रतीयमानं नाहं व्यास इत्यादि तस्मात् पशुनेत्यत्र त्रिलोचन इत्यत्र च प्रतीयमानवाच्यस्यै
व पदार्थस्य वाक्यार्थस्य च हेतुभावोपपादकतया काव्यलिंगस्यागमेव यथा यत्त्वन्नेत्रसमानकांति सलिले मग्नं त
दिंदीवरमित्यनेक वाक्यार्थहेतुककाव्यलिंगोदाहरणे त्वन्नेत्रसमानकांत्यादिकानींदीवरशशिहंसविशेषणानि ते
षां वाक्यार्थानां हेतुभावोपपादकानीति तत्र वाक्यार्थहेतुककाव्यलिंगे पदार्थहेतुककाव्यलिंगमंगमिति तत्तयोः का
व्यलिंगोदाहरणत्वे काचिदनुपपत्तिः उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः हनूमानब्धिमतरद्दुष्करं किं म
हात्मनाम् गुणवद्वस्तुसंसर्गाद्याति स्वल्पोपि गौरवम् पुष्पमालानुषंगेण सूत्रं शिरसि धार्य्यते सामान्यविशेषयोर्द्व
योरप्युक्तिरर्थान्तरन्यासः तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवति ततश्च विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यरू
पस्य सामान्ये प्रस्तुते तेन सहाप्रस्तुतविशेषविशेषरूपस्य च वाक्यार्थस्य न्यसनमर्थान्तरन्यास इत्युक्तं भवति तत्रा राम
द्यस्य द्वितीयस्योदाहरणम् द्वितीयस्य द्वितीयश्लोकः ननु अयं काव्यलिंगान्नातिरिच्यते तथा हि उदाहरणद्वयेप्य ८१

नहीत्यपासीत्यने ना
न्वयः

प्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसामान्ययोः कथमुपकरोतीति विवेक्तव्यम् न हि सर्वथैव प्रस्तु
तानन्वयप्रस्तुताभिधानं युज्यते ननावदप्रस्तुतप्रशंसायामिव प्रस्तुतव्यंजकतया प्रस्तुतयोरपि सामान्यविशेष
योः स्वशब्दोपात्तत्वात् नाप्युपमानालंकारस्येव प्रस्तुतप्रतीतिजनकतया [illegible] तद्
दिह व्याप्तिपक्षधर्मताद्यभावात् नापि दृष्टान्तालंकारस्येवोपमानतया विरूप्यपातदोषः स्ववधायैवलस्य वीर
कोपकरः वननरुभंगध्वनिरिव हीनिद्रा तस्करः करिणा इत्यादिषु सामान्ये विशेषस्योपमानत्वदर्शनेपि विशेष
सामान्यस्य क्वचिदपि तद्दर्शनादुपमानतया तदनन्वय सामंजस्याप्रतीतेश्च तस्मात्प्रस्तुतसमर्थकतयैवाप्र
स्तुतस्योपयोग इहापि वक्तव्यः ततश्च जातस्यार्थहेतुकं काव्यलिंगमेवात्रापि स्यात् नन्वनेकांतरस्याप्यव
काशः इति चेत् अत्र केचित् समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिंगं निरपेक्षस्यापि प्रतिभावैभवा
त्समर्थनेर्थान्तरन्यासः नहि यत्र वल्लेन समानकांतिसलिल इत्यादिकाव्यलिंगोदाहरणेष्विव अर्थोपारूढेष्वा
रदा शशांके प्राबल्यं यो प्रागुत्तन इत्करादत्ता कासांन सौभाग्यगुणोंगनानां नवः परिम्लानपयोधराणां दिवा
करानुरक्ताभियोगहासलीनं दिवाभीतमिवांधकारं क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव इ
त्यादौ अर्थान्तरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनापेक्षत्वमस्तीति वस्तुतस्तु प्रायेणवादोयमर्थान्तरन्यासे पि हि

स्य
सामान्यैर्विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्व मित्यनेनान्वयः ३

कु० नं० ४२ 43

विशेषस्य सामान्येन समर्थने नानपेक्षत्वेऽपि सामान्यं विशेषेण समर्थनमपेक्षते एव निर्विशेषं न सामान्यमिति न्या
येन बहूनामप्यसाराणां संयोगः कार्यसाधक इत्यादि सामान्यस्य तृणैरारभ्यते रज्जुस्तया नागोऽपि बध्यते इ
त्यादि संप्रतिपन्नविशेषावतारणं विना बुद्धौ प्रतिष्ठितत्वासंभवात् न च तत्र सामान्यस्य कासां न सौभाग्यगुणेन ग बहूनामिति
नानामित्यादि विशेषसमर्थनार्थसामान्यस्यैव लोकसंप्रतिपन्नतया विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं श्लोके ३
विशेषस्यसनम् ५ संभवतीति स्वलोके तन्न्यसनं नापेक्षितमिति वाच्यम् सामान्यस्य सर्वत्र लोकसंप्रतिपन्नत्वनियमाभावात्
नहि यो यो धूमवान्सोऽग्निमानिति व्याप्तिरूपसामान्यस्य लोकसंप्रतिपन्नतया यथा महानस इति तद्विशेष
रूपदृष्टान्तानुपादानसंभवमात्रेण प्रसिद्धव्याप्तिरूपसामान्योपन्यासेऽपि तद्विशेषरूपदृष्टान्तोपन्यासनैरपेक्ष्यं
न संभवति नचैवं सामान्ये विशेषसमर्थनस्थले पूर्वं कुचित्तस्य सामान्यस्य लोकप्रसिद्धत्वाभावेन तस्य बुद्धारो
हाय पुनर्विशेषान्तरन्यसनप्रसंग इति वाच्यम् इष्टापत्तेः अत्रैव विषये विकस्वरालंकारस्यानुपदमेव दर्शि
यिष्यमाणत्वात् किंच काव्यलिंगेऽपि न सर्वत्र समर्थनसापेक्षत्वनियमः चिकुरप्रकरजयंतीत्यत्र। म
तदभावात् उपमानवस्तुषु वर्णनीयसाम्याभावेन निंदायाः कविकुलतुष्टत्वेनात्र समर्थनापेक्षत्वविरहा १
त्तन्हित्तदास्यदास्येऽपि गतोऽधिकारिणां नशारदः पार्वतीपर्वतीश्वर इत्यादिषु समर्थनं दृश्यते नविशेषेण न

शास्त्रे(ण न)ति तान च मत्स्तुना अप्रतीकारपो रूप्याः स्त्रीभिरेव स्त्रियः कृता इत्यादि कार्यलिंगा विषयेषु स(
मर्थनापेक्षा विरहेप्यप्रतीकारपो रूप्या इत्यादिना समर्थनदर्शनाच्च नाहि तत्र स्त्रीणां विवादि निर्मितत्वा(
भाव प्रतिपादनं समर्थन सापेक्षं प्रसिद्धत्वात्तस्मादुभयतो व्यभिचारात्समर्थनापेक्षा समर्थनेकार्यलिं
गंतान्निरपेक्षसमर्थनेऽर्थांतरन्यास इति न विभागः किं तु समर्थ्यसमर्थकयोः सामान्य विशेष संबं(
धेऽर्थांतरन्यासलक्षिता संबंधे कार्यलिंगमित्येव व्यवस्था व धारणीया प्रपंचश्चित्रमीमांसायां द्र
ष्टव्यः एवमप्रकृतेन प्रकृतसमर्थनमुदाहृतम् प्रकृतेनाप्रकृतसमर्थनम् यथा यदुच्यते पार्व
ति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गत
३: म् यथा वा दानं ददत्यपि जलैः सहसाधिरूढे को विद्यमानगति रासितुमुत्सहेत यदंतिनः कटकटा
ह तटान्निमंक्षोर्मक्षु दपातिपीतः पटलै रलीनाम् पामिन्विशेषसामान्य विशेषाः सविकल्पः सनाजि(
ग्रमहतो हि द्विर्दर्पाः सागरा इव यत्रैकस्याचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्र आशिक्षावच्छप
रितुष्यता कविना तत्समर्थनाय पुनर्विशेषो न तत्रापमा इत्यर्थांतरन्यास विधया वा विन्यस्यते तत्र विक
ल्पालंकारः उत्तरार्द्धं यथा कथंचिदुदाहरणम् इदं तु प्रकृतमुदाहरणम् अनेनैतत्त्वप्रभवस्य यस्य हिंसनसो

कु० नं-
५५
55

भायविलोपिजातम् एको हि दोषो गुणसंनिपाते निमज्जतींदोः किरणेष्विवांकः इदमुपमालीत्या विशेषोक्त
न्यसनेउदाहरणम् अर्थान्तरन्यासनविपर्ययच्या करणं हनुदमंतरेतारणिताहत्व का कल्पयमिस्कें दंमक आमम
रंदष्णालिंतमिह त्वामन्महे को किलं धन्यानिष्फलवैभवेन कांतिचिह्नलूनिकं स्तूरिकाने पालाक्षितिपाल
भालपतिते पंकेनशंके तत्क: यथावा मालिन्यमंबरतलाश्रितोमधुलिड् कलंकोपजातोम् स्वेतुतवद्दकतिल
कात्मजाभं दोषाविति: कंचनमेलनतोगुणत्वंवकुर्याणोहि वचास्मिन्मम विमलमो प्रौढोक्तिः उत्कर्षा
त्व हेतौ तद्धेतुप्रकल्पनम् कचाः कालिंदजातीरतमालस्तोममेचकाः काप्योतिशायाहेतौ तद्धेतुत्वपरी
कल्पनं प्रौढोक्तिः यथावत्ताननेत्यातिशयाहेतौ पनुनातनरोहणे तद्धेतुत्वपरिकल्पनम् यथा क
ल्पतरुकामदोग्ध्री चिंतामणिधनदशंखानां रचितोरजोभिरपघनस्तेजःस्वाप्रांतरांवरैरेष: अत्रकल्पद्रुमा
द्यैकैकवितरणोत्तिर्थिवर्णनीयराजवितरणहेतौ कल्पवृक्षपरागादिरूपभूतपंचनिर्मितत्वेन तद्धेतु(
त्वपरिकल्पनं प्रौढोक्तिः संभावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये यदि शेषो भवेद्वक्ता कथिताःस्यु
र्गुणास्तव यथावा कस्तूरिकामृगाणामंडाद्गंधगुणमखिलमादाय यदि पुनरहं विधिःस्यां खलजिह्वा(ए
यां निवेशयिष्यामि यद्यर्थोक्तौ कल्पनमतिशयोक्तिभेद इति काव्यप्रकाशकार: किंचिन्मिथ्यात्वाति

अर्थमिथ्याध्यवसितकल्पनम् मिथ्याध्यवसितिर्विशेषणं जगायेत्वलजं वहन् अत्रवेश्यावशीकरणस्यात्यंतासं
भावितत्वसिद्धयेगगनकुसुममालिकाधारणरूपार्थांतरकल्पनं मिथ्याध्यवसितिः यथा वा अस्वनोति(
पतेः परार्द्धपरणालक्ष्मीकृताः तं (च्यव्य) प्रत्नाच्च मूवेस्यमाणेव पि(भ्रष्या) किलाकीर्तयः गीयंते स्वरमय
घमं कलपत्ताजातेन वंध्योदराज्जूकानां प्रकरेण कूर्मरमणी दुग्धोदधे लोपशि अत्रा पोदाहरणे निदर्शनागर्भे
छिन्नोपंनपुष्पमम असंबंधेसंबंधपक्षपातिशयोक्तितो मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिध्यर्थं मिथ्या
र्थांतरकल्पनात्मना विच्छित्तिविशेषेणभेदः प्रस्तुतेवर्ण्येवाक्यार्थप्रतिबिंबस्यवर्णनम् लालितं निर्गते
नीरे सेतुमेषा चिकीर्षति प्रस्तुतेधर्मिणि योवर्णनीयो वाक्यार्थस्तमवर्णयित्वा तत्रैव तत् सरूपस्यक प्रस्तुतेएव
स्याचिदप्रस्तुतवाक्यार्थस्यवर्णनं ललितम् यथा कथंचिद्दाक्षिण्ये समागत तत्कान्तेपेहितप्रतिनिवृत्त
नायिकोत्तरासक्तनायकानयनार्थं सखीं प्रेषयितुकामां तां पिकप्रद्विपसख्यावचने तच्चापारप्रतिविं सरूपभूत
जल बभूतां तंतसेतुबंधवर्णनम् नेयमलंतरप्रशंसा प्रस्तुतधर्मित्वात् नापिसमासोक्तिः प्रस्तुतवृत्तांतेवर्ण्यमा
नेश्लेषेणासाधारण्येन साहूप्येण वा अप्रस्तुतवृत्तांतस्फूर्त्यभावात् अप्रस्तुतवृत्तांतोऽत्र सरूपादिह प्रस्तुत
वृत्तांतस्यगम्यत्वात् नापिनिदर्शना प्रस्तुताप्रस्तुतवृत्तांतयोः संबंधोपात्तयोरैक्यसमारोपएवतस्याः सं

कु॰ नं॰
८५
45

न्मेषात् यदि विषयविषयिणोः शब्दोपात्तयोः प्रवर्त्तमान एवालंकारो विषयिमात्रोपादानेपि स्यात् तद्रूपकमेव तदा
भेदेप्यभेदरूपायामतिशयोक्तेरपि विषयमार्गमेतत् नन्वत्रालंकृतप्रस्तुतनायकादिनिगरणेन तत्र शब्दोपा-
त्ताप्रस्तुतनीरायभेदाध्यवसायप्रतीतिभेदेऽभेदरूपातिशयोक्तिरस्तु एवं तर्हि सादृश्यनिबंधनाः प्रस्तुतप्रशं-
साविषयेपि सैवातिशयोक्तिः स्यात् अप्रस्तुतधर्मित्वात्तन्न भवतीति चेत् तत्राप्रस्तुतधर्मिवाचकपदस्यापि अप्रस्तुतप्रशंसाया
प्रतिशयोक्ताविवाप्रस्तुतधर्मिलक्षकत्वसंभवात् नन्वप्रस्तुतप्रशंसायां सरूपादप्रस्तुतवा-
क्यार्थात् प्रस्तुतवाक्यार्थोवगम्यते तत्वातिशयोक्ताविव विषयिवाचकैर्लक्षितपदैर्विषयालक्ष्यंत इति भे-
द इति चेत् तर्हि हापि प्रस्तुतगतादप्रस्तुतवृत्तांतरूपाद्वाक्यार्थात् प्रस्तुतवृत्तांतरूपो वाक्यार्थो व- त
गम्यत इत्यतिशयोक्तितो भेदोस्तु वस्तुतस्तु सोपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः धामदवि-
स्मृतं स्वपरच्छिकिं भूयसोक्तेन वा पूर्वं निष्पिंजवानसि भ्रमर हे यद्वारणोप्यद्यापैन्तः शून्यकरो निषे-
व्यत इति भ्रातः कएष ग्रहः इत्यप्रस्तुतप्रशंसोदाहृतो प्रथमप्रतीतादप्रस्तुतवाक्यार्थात् प्रस्तुतवाक्या- ए
र्थोवगम्यते इत्येतन्न घटते अप्रस्तुतेवारणे स्वभ्रमरसेव्यत्वनिराकारणे कर्णचापलमात्रस्य भ्रमरनि-
रासकारणस्य हेतुत्वसंभवेपि रसनाविपर्ययोन्तःशून्यकत्वयोर्हेतुत्वासंभवेन मदस्य प्रस्तुतत्वेम ५

त्व एव हेतुत्वेन रसनादिपर्य्यायादीनां तत्र हेतुत्वाच्च पार्श्वे वा ए(तो) परस्परं दुष्प्रापरूप। विशेषणकोटीकारेणैव प्र
वर्त्तेर्वक्तव्यत्वादेवं सत्यपि यत्र प्रस्तुते संबोधनादि विच्छित्ति विशेषाः तत्र प्रस्तुतप्रशंसापि अतिशयोक्ति
कोमे दोपरते तदा तत्रापि प्रस्तुतं तत्पदेन निर्दिश्यते तत्र अप्रस्तुतवर्णनेन रूपस्य विच्छित्ति विशेषस्य सद्भा
वात्ततो भेदः प्रस्तुतं परते प शप नीलोत्पलच्छद्मापीकास्वे स्फुरति गगने तत्पांशु रसपयेत्यादि भि(
ति तु प्रस्तुतस्य कस्यचिद्धर्मिणः वाचकेनानिर्दिष्टत्वाद् तिशयोक्तिरेव एतेन गतजलसेतुवं पवर्णना
दिषु अप्रस्तुतं वे पसे वे पवर्णनरूपातिशयोक्तिरित्ति शंका निरस्ता तथा सति कतत्वं मो कथयामीत्या
सं दावपि तत्संगात्साम्य निवे पनप्रस्तुतजाकार्याव्याति रूपविच्छित्तिविशेषेणालंकारान्तरकल्पन
मिहापि तुल्यं तस्मात्सर्वालंकारविलक्षणमिदम् ललितम् यथा वा क्व सूर्य्यः प्रभवो वंशः क्वचाल्प
विषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् अत्रापि निदर्शनाकाशे निर्निकार्य्या ईदृश्यामत्या(
सूर्य्यवंशं वर्णयितुमिति प्रस्तुतार्थे तज्जन्यासामान्यति विं वाः प्रस्तुतार्थे वर्णनेतादृशे विषमालंकार वि
न्यासेन च केवलेनात्पर्य्यस्यागम्यमानत्वात् यथा वा त्रनापिदेशः कतमत्त्वि यापवसेतम कस्यद

कु०नं० शां वनस्य त्वदामसंकेततया कृतार्थामप्यव्यापिनानेन जनेन संज्ञा अत्र कतमो देशस्त्वया परित्यक्त इति प्रश्न
मितार्थमुपन्यस्य वसंतमुक्त वनस्य दश्यामनकायीति तत्प्रति विंबभूतार्थमात्रोपन्यासाल्ललितालंकारः उत्कंठि
५६ तार्थसंसिद्धि विनायत्नं प्रहर्षणं तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका उत्कंठा इच्छाविशेषः सर्वेंद्रियसुखा
56 स्वादो य आसीत्तमभिमन्यते तत्प्रीव्यां ससंकल्पामुत्कंठां कवयो विदुरित्युक्तलक्षणं तद्विषयस्य तदुपायं
पादनयत्नं विना सिद्धिः प्रहर्षणमुदाहरणमस्फुटम् यथा वा मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमै
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्ज
यंति यमुनाकूले रहःकेलयः अत्र राधामाधवयोः परस्परमुत्कंठितत्वं प्रतिस्फुटतरम् अत्रैव च ग्रंथकारेण
निकुंजमित्यत्रोदाहरणे लक्षणानुगतिः वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् दीपमुद्योतयेद्यावत्तावत्
दभ्युदितो रविः स्वयम् यथा वा चातकस्त्रिचतुरान्पयःकणान्याचते जलधरं पिपासया सोऽपि पूरयति विश्व ५२
मंभसा हंत हंत महतामुदारता यत्नादुपायसिद्ध्यर्थात् साक्षाल्लाभः फलस्य च निध्यंजनौषधीमूलं खनता एम
साधितो निधिः फलोपायसिद्ध्यर्थात् यत्नान्मध्ये उपायसिद्धिमनपेक्ष्य साक्षात्फलस्यैव लाभोऽपि प्रहर्षणम्

यथा निधिं जनस्ति धर्षमूलिकां वनतस्तत्रैव निधेर्लाभः यथा वा उच्चित्य प्रथममवाप्तिं मणीन्द्री शुभ्रोयं श्रितविटपं।
गृहीतुकामा आरोढुं पदमदधाद्दशोक यथा वा मूलं पुनरपि तेन पुष्पितामभूत् अत्र पुष्पग्रहणोपायभूतारोहणसि
ध्यर्थमन्यदत्तिदधाना तत्रैव पुष्पग्रहणलाभः दृश्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम् दीपमुद्योतयेद्यावल्लिर्वा
णस्तावदेव सः यथा वा रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पंकजश्रीः इत्थं विचिंतयति
कोशगते द्विरेफे हा हंत हंत नलिनीं गज उज्जहार एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि अपि मां पावयेत्साध्वी
स्नात्वेतीच्छति जान्हवी काठिन्यं कुचयोः स्रष्टु वांछत्यः पादपद्मयोः निंदंति च विधातारं त्वद्धाटीक्षीर्यो षितः। यात्राणुद्
तदभावं धनस्येव पलायते सज्जनं लाभो यमेवं भूपालसेवकानां न चेष्टः कस्यचिद्गुणेनान्यस्य गुणः दोषे द्वि
ण दोषो गुणेन दोषो दोषेण गुणेन वा यत्र वर्ण्यते स उल्लासः द्वितीयार्धमाद्यस्योदाहरणम् तत्र पतिव्रतामहिम
गुणेन तत्स्नानतो गंगायाः पावनत्वगुणो वर्णितः द्वितीयश्लोके द्वितीयस्योदाहरणम् अत्र राज्ञो धाटीषु पलाय
मानानां आरीयोषितां परयोधावनपरिपंथिमार्दवदोषेण तयोः काठिन्यमस्त्वित्यभ्यर्थ्य कुचयोस्तु स्तवको धातु
र्निंद्यत्व दोषो वर्णितः तृतीयश्लोके तृतीयचतुर्थयोरुदाहरणं तत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयत्वं दोष
त्वेन राज्ञः कोऽप्यदोषेण तत्सेवकानां वधं विनानिर्गमनं गुणत्वेन वर्णितम् अनेनैव क्रमेणोदाहरणं ज्ञातव्यम्।

यथा यदयं रथसंक्षोभादंसेनांसो निपीडितः एकः कृती तदंगेषु शेषमंगं भुवो भरः अत्रनायिकासौंदर्य्यगुणतदंस
कु॰ नं॰ निपीडितस्य स्वांसस्य कृतित्वगुणो वर्णितः लोकानंदनचंदनद्रुमसखे नास्मिन्वने स्थीयतां दुर्वंशैः कठिनैरसा
८० रहृदयैराक्रांतमेतद्वनम् तेषामन्योन्यनिघर्षजातदहनज्वालावलीसंकुलान्नत्वान्येव कुलानि केवलमिदं स
५१ र्वं दग्धुं प्रवृत्तं वनम् अत्र वेणूनां परस्परसंघर्षात्संजातदहनसंकुलत्वदोषेणैव नाशरूपो दोषो वर्णितः दानार्थिन
नो मधुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुध्या तस्यैव गंडयुगमंडनहानिरेषा भृंगाः पुनर्विकचपद्म
वने चरंति अत्र भ्रमरगणमलंकरणत्वगुणेन गजस्य तत्क्षतिस्ते यो दोषत्वेन वर्णितः आप्रांतं पाखिं वितं
परिमुकुलीढिं पुनश्चर्वितं त्यक्तं वाभ्रविनीरसेन मनसा तत्रत्यपांथाकृपाः हे सख्युः इत्थं नवेतदेव कुशलं य
हृष्टं नरेणाद्य यदंतः सारविचारणक्षमतानीना चूर्णीकृतं नाश्मना अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णना
भावो गुणत्वेन वर्णितः अत्र प्रथमचतुर्थयो हल्लासोन्वर्थः मध्यमयोः चन्निन्यायेन लाटानुप्रासिकः ताभ्यां
तोयदि नस्यात्तामबह्मालंकृतिश्रुसा स्वल्पमेवांबु लभते प्रष्ठं प्राप्य पिपासागमे मीलंतियादि पद्मानि काहा राम
तिरमृतपुतः ताभ्यां गुणदोषाभ्यां नो गुणदोषौ अत्र कस्यचित् गुणेनान्यस्य गुणलाभे द्वितीयार्द्धमपहृत्यम
दोषेणादोषस्य प्राप्तौ तृतीयार्द्धं यः मदुक्तिश्चेदंतर्मदयति सुधीभूय सुधियः किमस्या नामस्या दत्तपुरुषा ८१

नीदरभरैः यथा दूनस्तद्धृत्परमरमणीयापि रमणी कुमाराणामन्तःकरणहरणं नैव कुरुते त्वचेत्तत्संवरसेव षेण ।
लघुता का नाम दिदं तितनं व्याप्तैः कंकणभूषणानि कुरुषे हा तिर्न हे मामः पि मूर्द्धन्यं कुरुषे जडोऽसुमयशः किं
नाम लोकत्रयीदीपस्यांबुजवांधवस्य जगत्तामीशोऽपि किं ब्रूमहे अन्त्रापे कावित्तारमणीगणाभ्यामलसवा ।
लहृदयोल्लासरूपगुणाभावो नास्ति ॥ द्वितीयेऽपरमेश्वरानंदिकाद्दोषेणाद्रिजानां लघुताद्दूषणदोषाभावोऽव
तिष्ठते ॥ दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात् विपरः सन्तुनः शश्वत्तयासु संकीर्त्यतेऽहीः यथावा मय्येव
जीर्णतां यातु यत्त्वयोपकृतं हरे नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षति इत्यं हनुमंतं प्रति राघवस्योक्तिः अ
त्र प्रत्युपकाराभावो दोषः तदभ्युपगमहेतुर्गुणो विपत्त्याकांक्षायाः प्रसक्तिः साचव्यतिरेकमुखेनोपयुक्ते नसा
मान्येन विशेषसमर्थनरूपेणार्थान्तरन्यासेन दर्शिता यथावा भजेम भवदंतिकं प्रकृतिमेत्य पैशाचिकीं कि
मित्यमरसंपदं प्रमथनाथनाथामहे भवज्जवनदेहलीवहलतुंगरंगत्तरंगतिरस्कृतकोटिभिर्मपवदादिभिर्भूप
ते लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् आविलेषु विहंगेषु हंतस्वच्छंदचारिषु शुकपंजरबंधस्ते मधुराणां
गिरां फलम् दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्पनं च लेशः उदाहरणोऽन्ननोवहुमन्ते पि विदुषिपुत्रे चिरं राजधा
न्यां प्रवसति तद्दर्शनोत्कंठितस्य गृहोऽस्थितस्य पितुर्वचनम् अप्रस्तुतप्रशंसासं तत्र प्रमोर्द्ध इतरावि हंतानाम
विकर ७

कु·नं·
५८
48

वक्तृत्वस्य दोषस्य प्रत्यवेदवारणानुकूलतया गुणत्वं काल्पितम् द्वितीयार्द्धे मदोऽप्रियो भित्त्वस्य गुणस्य पेजवंधहेतुतया
दोषत्वं काल्पितम् न चात्र व्याजस्तुतिशङ्कनीया न ह्यत्र विहितं गुणत्वस्तुतिव्याजेन निन्दा पौष्पकस्य निन्दाव्याजेन
स्तुतो वा तात्पर्यं किंतु प्रत्यर्थिनोत्वं किं तस्य दोषगुणयोर्गुणदोषत्वाभिमान एवात्र पूर्वश्लोके निबद्धः ॥ यथा संतःस(
च्छिन्नितोदयव्यसनिनः प्रादुर्भावयन्त्रिणः सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा अव्युत्पन्नमतिः कृते
न न सता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः इतीत्वत्रोदाहरणे पूर्वे गुणस्य
न राज्ञा योग्यत्वे पत्निहृर्जितः गुणोत्वमेव मनः सकं यस्य कामोन्नत्वादापि चपलो निर्दयश्च सो जनः किं तेन मे
साक्षि आगः प्रमार्जनायैव चाटवो येन शिक्षिताः अत्रापि श्लोके राज्ञो वृत्तिसेवकस्तुतिः कन्यापालिरंतं भो
गालिविविक्तः दोषत्वेन प्रतिभासितमित्यभिप्रेत्यविदायस्त्वया राज्ञकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णि
तः उत्तरश्लोके सखीभिरूपदिष्टं मानं कर्त्तुमशक्ता यापिता सामग्रतोमानपरिग्रहानुगुणं प्राप्तिज्ञापनं निर्वाहमा
क्षोकमानया सखीनामुपहासं परिजिहीर्षया नायिकया तस्य चाटुकारितागुण एव दोषत्वेन वर्णितः न चात्र श्लो
केस्तुतिनिन्दापर्यवसायिनी द्वितीयश्लोके स्तुतिंदास्तुतिपर्यवसायिनीति व्याजस्तुतिशङ्कनीया राजप्रकोपादि
परिहारार्थमिह निंदाभासस्य वा तं विदितं लेश त एवौघाटनेनंतो लिखिषादिति वस्तुतस्तु स्तुत्या जस्तुति सद्भावेपि न दोषः
द् त

न ह्येतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावः प्रसज्यते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात् नापि व्या
जस्तुतिमात्रस्य लेशांतर्भावः प्रसज्यते भिन्नविषयव्याजस्तुत्युदाहरणेषु कस्त्वं वानर रामराजभवने लेखार्थ
संवाहको यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषेत्यादिषु दोषगुणीकरणस्य गुणस्य दोषीकरणस्य वा
भावात् तत्रान्यगुणदोषाभ्यामन्यत्र गुणदोषयोः प्रतीतेः विषयैक्येपि इंदोर्लक्ष्म त्रिपुरजयिनः कंठमूलं मु
रारेर्दिङ्नागानां मदजलमषीभांजि गंडस्थलानि अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्याभासंते
वद धवलितं किं यशोभिस्त्वदीयैः इत्याद्युदाहरणेषु लेशस्यास्पर्शनात् अत्र हि इंदुलक्ष्मादौ धवलीकरणाभा
वदोष एव गुणत्वेन न पर्यवस्यति किंतु परिसंख्यारूपेण ततोन्यत्सर्वं धवलितमित्यन्यगुणः प्रतीयते क्वचि
द्व्याजस्तुत्युदाहरणेषु दोषीकरणासत्त्वेपि स्तुतेर्विषयांतरमपि दृश्यते यथा सर्वदा सर्वदोसीति मिथ्या त्वं
कथ्यसे बुधैः नारयो लेभिरे पृष्ठं न वक्षः परयोषितः अत्र हि वाच्यया निंदया परिसंख्यारूपेण ततोन्यत्सर्व
मभिमतमर्थिनो दीनाराद्दीयत इति स्तुत्यंतरमपि प्रतीयते एवं चैवमादिषूदाहरणेषु कस्ते शौर्यमदो योद्धुमित्या
दिषु गुणदोषकरणाद्विकमेव व्याजस्तुतिरूपं तथापि तिष्ठते तत्र लेशव्याजस्तुत्योः संकरोस्तु इत्थमेव
हि व्याजस्तुत्यप्रस्तुतप्रशंसयोरपि प्राक्संकरो दर्शितः सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः नितं

कु०नं० ५९ वर्गावर्तितरुणी हृद्युग्मविपुलाचसा अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्यास्तनयुग्मो युग्मविपुला-
नास्यास्तनयुग्मौ मकत्वरूपसूच्यार्थसूचनं मुद्रा यथाप्यत्र ग्रंथे वृत्तनाम्नो नास्ति सूचनीयत्वं तथाप्यस्यो
नायकोस्य लक्ष्यलक्षणयुक्तत्वेद: शास्त्रोपात्तत्वेन तस्य सूचनीयत्वमस्तीति तदभिप्रायेण लक्षणे योज्यम
एवं नवरत्नमालायां तत्कृत्वाता नाम निवेशनेन तत्तन्नायिकाजातिसंसूचनम नक्षत्रमालायामश्व्यादि
देवतानामभिर्नक्षत्रसूचनमित्यादावप्ययमेवालंकारः एवं नाटकेष्वप्यस्यमाणार्थसूचकेष्वपि क्र
मिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः यथा गणस्य: पतिर्लक्ष्म्याः सर्वेशस्त्वं महीपते॥ अत्र चतुरास्या
दिपदे वर्णनीयस्य ब्रह्मविष्णुरुद्रात्मतापि प्रतीयत इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशितं
रत्नावली यथा वा रत्यामपि पतिं व्यनेककठिनता वासेरसालिंगिते प्रल्हादैकरसे क्रमादुपचिते भूम
कुत्वाप्येह कोकस्पर्द्धिनि भोगभाजि जनितानोये वलीनो मया विभाति श्रीमेण वतारदशाकं वालेभ
वत्याः स्तने प्रसिद्धसहपाठानां प्रसिद्धक्रमानुसरणेप्ययमेवालंकारः यथा यस्य च हिमयो हृदयेषु
जलमयो लोचनपुटेषु मारुतमयः श्वसितेषु तमामयोऽगोषु आकाशमयः शून्यतासु पेच महाभूतम
यो मूर्तिरिवाहस्पतनिहत्तक्रनिसामं तान्तः प्रोषप्रताप: एवमष्टलोकनवग्रहादीनां प्रसिद्धसहपाठानां राम ५९
न३

यथाकथंचित्स्रुतोपमानोपमेयकत्तादिप्रकारेण निवेशने विरलावल्पालंकारः प्रकृतान्वयो विना क्रमिक
तत्तनाम्लांश्लेषभंग्या निवेशने प्युपमेवालंकारः तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः पद्मरागायते ना
सामौक्तिकं तेऽधरत्विषा यथा वा वीरत्वद्रिपुरमणीपरिधानं पल्लवानि संस्पृश्य नहरंति वनभुवि निजक
रुहरुचिरवस्थिता निपीड्य पत्रपिपा पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् हरकंठांशुलिप्तोपि शे
षस्त्वद्यशसा सितः यथा वा विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या रत्नैः पुनर्यत्र रु रथ्यो ढारः
चा रुचं स्वामानिन्यिरे वंशकरीरनीलैः अयमेव तद्गुण इति केचिदाजहुः पूर्वावस्थानुवृत्तिश्च वि
कृते सति वस्तुनि दीपे निर्वापितेप्यासीत्कांचीरत्नैर्महन्महः न तद्गुणोऽचकाएत्पूर्वरूपमिति तत्स्पवा
चकपदानुवृत्तिः यथा वा ज्वालं रवज्ञि मिराद्वृतं तंबहिरपि प्रत्विन्लागौडैरज्जैरंते कंचुकिमिर्लपन्मारि्ध
रैर्ध्यातिताभूमयः आक्रोतं मरिषीभिरेवशायनं त्वद्विद्विषां मंदिरे राजन्नैव चिरं तनप्रणपिनीशस्त्रैरा वि
ज्यसीति संगतान्यगुणानंगीकारमाहुरतद्गुणम् चिरं रागिणि मच्चित्ते निहितोपि न रज्यसि यथा वा
गंगाम्भोसि विहरतिमरैः पिबिलेदिग्गजानां वैरिश्रीणां नयनकमले पंजनानि प्रमार्ष्टि यद्यप्येषा हिमक
रकरद्वैतसोनत्तिकीर्तेः कीर्तिर्दिक्षु स्फुरति तदपि श्रीनृसिंहास्तितीद्रु ननु चान्यगुणेनान्यत्रागुणोहपान

कु० नं०
५०
50

दयरूपाभ्यामुल्लासावज्ञालंकाराभ्यां तद्गुणातद्गुणयोः को भेदः उच्यते उल्लासावज्ञालक्षणयोर्गुणशब्दो दोषप्र
तिपक्षवाची अन्यगुणेनान्यत्र गुणोदयतदनुदयौ च न तत्स्यैव गुणस्य संक्रमणासंक्रमणे किंतु सद्रूप
देशेन सदसद्विषययोर्दानोत्पत्त्यनुत्पत्ती तद्गुणातद्गुणयोः पुनर्गुणशब्दो रूपरसगंधादिगुणवाची त
त्रान्यदीयगुणग्रहणाग्रहणे च रक्तस्फटिकवत्स्वमालिन्यादिन्यायेनात्मीयगुणे नैवानुरंजनाननुरंजने विव
क्षिते तथैव चोदाहरणानि दर्शितानि यथा पूर्वावज्ञालंकृतिरतद्गुणस्य च विशेषोक्तिविशेषावेव कापि जि
निर्विशेषोक्तिः स निपुणकलकाले इति तत्तामात्मतद्गुणाकांतत्वात् तथापि उल्लासतद्गुणप्रतिद्वं
द्विना विशेषाकारेणालंकारांतरतया परिगणितानीति ध्येयम प्राकृतिकस्वगुणोत्कर्षनिगुणः पत्तेलि
पे: नीलोत्पलानि दधते करान्द्वे इति नीलत्वाम् यथा वा कपिकपिच्छिकापिशापनमदमत्तोवाश्चिकेन सं
दष्टः अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य अत्र कपित्वजात्यावृत्तः स्थिरस्यैव कृतस्य मध्ये
वादिभिरुत्कर्षः मीलितेपदिसादृश्याद्भेदग्रहणं न लक्ष्यते रसोनात इत्यादावायाश्चरणे सहजाहरणे यथा
वा मल्लिकामालभारिण्यः सर्वांगीणार्द्रचंदनाः क्षौमवत्यो न लक्ष्यंते ज्योत्स्नायामभिसारिकाः अत्रा
पि च गोलकक रसयोरहारिमर्यणसाम्याद्भेदो न प्रवक्ताय क्षितौ योदाहरणे चंद्रिकाभिसारिकाणां धव ए

तिरस्कारात्साम्याद्भेदानध्यवसायः सामान्यं परिहासाद्विशेषो नोपलक्ष्यते पद्माकरप्रविष्टानां मुखेना
नालक्षि सुभ्रुवाम् यथा वा तल्लाभेषुसंक्रान्तप्रतिबिंबशतैर्वृतः लंकेश्वरः सभामध्ये नज्ञातो वालिसूनु(
ना मीलितालंकारे एकेन प्रस्तुतेनाभिन्नस्वरूपानवभासरूपं मीलनं क्रियते सामान्यालंकारे तु भिन्नस्वरूपावभा
सेपि व्यावर्तकविशेषो नोपलक्ष्यत इति भेदः मीलितोदाहरणे हि चरणादेर्लाक्षान्तरत्वेनार्द्रेणाङ्कं यावकादि
नभासते सामान्योदाहरणे पद्मानां मुखानां च तत्पत्त्रतेणाभानमहत्त्वेन तथा दर्पणस्फुटतम्प्रतिबिंबानां
च किंचिदंपसंमुखं विलोयं प्रतिबिंबइति विशेषः पौनोपलक्ष्यते अतएव भेदतिरोधानं मीलितम् तद्तिरो
धानेपि साम्येन व्यावर्तकानवभासे सामान्यमिति उभयोरप्यन्वर्थता केचित्तु स्वरूपस्य तस्य तिरस्कारात्तिरो:
केनचिद्बलीयसा तदन्यस्य स्वरूपतिरोधाने मीलितम् स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधाने सामा
न्यम् एवं च अपांगतरले दृशौ तरलवक्रवर्णा गिरो विलासभरमन्थरा गतिरतीव कान्तं मुखं इति स्फुरितं नाके(
मृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यत इत्यत्र मीलितालंकारः अत्र हि दृक्तारल्या
दीनां नायिकागुणः सहजधर्मत्वान्मदोदयकार्यत्वाच्च तदुभयसाधारण्यात् उत्कृष्टतारल्यादियोगिना वपु
षा मदोदयस्य स्वरूपमेव तिरोधीयते लिंगसाधारण्येन तज्ज्ञानोपायाभावात् न्तिकामात्यभातिरण्यत्वादिषु

कु० तं०
५१
राम
5|

तन्मते पद्माकरप्रविष्टानामित्यादौ भेदाध्यवसायेपि व्यावर्तकास्फुरणेनालंकारांतरेणाभावम् सामान्यालंका
रांतरभेदेन वा पूर्वमिन्मते स्वरूपातिरोधानेनालंकारांतरेणाभावम् मीलितावांतरभेदेन वा भेदवैशिष्ट्य
योः स्फूर्त्या उन्मीलितविशेषकौ हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते ललाटाक्षोदिते चंद्रे पद्मानि च मु
खानि च मिलितत्वायेन भेदानध्यवसाये प्राप्ते कुतश्चित्कारणाद्विशेषस्फूर्त्तौ तत्प्रतिद्वंद्वी विशेषकः क्र
मेणोदाहरणद्वयम् तद्गुणरीत्यापि भेदानध्यवसायप्राप्तावुन्मीलितं दृश्यते यथा नृत्यज्जूर्णाट्टहासप्रसरसह
चरैलावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति परितः श्रीनृसिंहक्षितींदु नैस्याद्धैष नाभीकमलपरि
मलप्रौढिमासादयिष्यद्देवानां नाम विष्वत्कथम् पिकमलाकाभुकस्यावबोधः काकः कृष्णः पिकः कृ
ष्णः को भेदः पिककाकयोः वसंतकाले संप्राप्ते काकः काकः पिकः पिकः इदं विशेषकस्योदाहरणांतरम्
अत्र द्वितीयकाकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थांतरसंक्रमितवाच्यौ यथा वा वार
णसीवासवतां जनानां साधारणे शंकरलोकलब्धेपि पार्श्वप्रहारव्रण मुत्तमांगे प्राचीनमीशं प्रकटीकरोति
किंचिदाकूतसहितं स्याद्गूढोत्तरम् उत्तरम् यत्रासौ वेतसी पांथ तत्रेयं सुतरां सरित् सरित्सेतरणमार्गापृच्छ्वं एमत
तं प्रति तं कामयमानाया उत्तरमिदं वेतसीकुंजे स्वाबंध्य मित्याकूतम् ग्रामेऽस्मिन्प्रस्तरप्रायेनाकिं चित्संघ ५

विद्यते पयोधरोन्नतिं दृष्ट्वा वक्तुमिच्छसि चेद्वद आभरणादिकमर्घ्यसमानं पाथ्यं प्रसुप्तिरियम् स्तनोन्न
तिं दृष्ट्वा रंतुमिच्छसि चेद्वद अविदग्धजनप्राये ऽस्मिन्ग्रामे काश्चिदवाग्निष्यतीत्येतादृशं प्रतिबोधकं किंचिद
पि नास्तीति हृदयम् इदमुल्लेखप्रश्नस्योत्तरस्योदाहरणम् निबद्धप्रश्नमुत्तरं यथा कुशलं तस्या जीवति कु
शलं पृच्छामि जीवतीत्युक्तम् पुनरपि तद्देव कथयसि मृतां नु कथयामि या श्वसितीति ईर्ष्यामानानंतरम
नुतप्ताया नायिकायाः सखीमागतां प्रति कुशलं तस्या इति नायकप्रश्नः जीवतीति सख्या उत्तरं जीवत्याः
कुतः कुशलमिति तदभिप्रायः अन्यत्पृष्टमन्यदुत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति प्रश्नः पृष्टस्यो
त्तरमुक्तमित्यभिप्रायेण जीवतीत्युक्तमिति सख्या वचनं सखीवचनोद्घाटनार्थं पुनरपि तद्देव कथयसीति
नायकस्याक्षेपः मृतां नु कथयामि या श्वसितीति स्वाभिप्रायोद्घाटनं मरणोत्तस्याः कुशलं भवति मदागमन
समयेऽश्वासे संचरन्तु कथं तां मृतां कथयेयमित्यभिप्रायः प्रश्नोत्तरांतराभिन्नमुत्तरं चित्रमुच्यते के
दारपोषणरताः के खेटाः किं चलं वयः अत्र केदारपोषणरता इति प्रश्नाभिन्नमुत्तरम् के खेटाः किं चलम्
इति प्रश्नद्वयस्य वयः इत्येकमुत्तरम् उदाहरणांतरं यथा विदग्धमवमेऽनेदृष्यति सूक्तं पणशाया मित्रेतर
साकूतं वेष्टितम् मयि पश्यति साकेशैः सीमंतमणिमावृणोत कामुकस्यावलोकनेन संकेतकालप्रश्न

कु. नं.
५२
52

भावं ज्ञातवत्याश्चेष्टेयम् अस्तंगते सूर्ये संकेतकाल इत्याकूतम् यथा वा संकेतकालमनसं विटं ज्ञात्वा वि
दग्धया हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं विहितं परावृत्तां संज्ञातुः साकूतचेष्टितं प्रिये गृहागते प्रातः
कांता तल्पमकल्पयत रात्रौ सपत्नीगृहे जागरणेन श्रान्तोसीति तल्पकल्पनाकूतम् यथा वा वक्षस्येंदि
स्विदविंदुप्रबंधे ईर्ष्याभिन्नं कुंकुमं काञ्चीकंठे पृत्वं तन्व्याब्जयती वक्षसि त्वया पाणौ लेखेवा लिलेख
अत्र स्विदानुमितं प्रहर्षापितम् प्रहर्षोचिताकूतं तावत्तेन प्रकाशितम् व्याजोक्तिरन्यहेतूक्त्या तदाकारस्य
गोपनम् सात्त्विकपक्षपगृहाणामपराणौ रासि पूता। अत्र चौर्यरतकृतसंकेतभूपत्रलोठनेन लातपूति
जालस्य गोपनम् यथा वा कल्पवानभवेद्दोषैः प्रियापाः सद्व्रणोऽधरे सभंगं पद्ममाघ्रासीर्वारितासि मयापु
ना उपपत्तिना खंडिताधराया नायिकायाः सकाशमागतं प्रियमपश्यंत्येव सख्या नायिकां प्रतिहितोप
देशव्याजेन ते प्रतिनायिकापराधगोपनम् ब्वेकापह्नुतेरस्याप्ययं विशेषः यत्तस्यां वचनस्यान्य
घ्यानयनेनापह्नवः अस्याभाकारस्य हेतुत्वं तत्र वर्णनेन गोपनमिति लक्षणेलस्य नाक्लिष्टोक्तिग्रहणा
माकारस्योपनार्थमिहेत्वं तत्प्रस्तायकव्यापारमात्रोपलक्षणम् ततश्च आपीतमालोकही ग्र राम
तोल्पा मात्याः प्रह्लादनरणासेका रोमांचकंपादिभिः सूच्यमानं भामाज्यगृहे प्रणामेत्यर्थेनमिस्य ५२

वापि व्याजोक्तिरेव तत्र स्वानुरागकृतस्य रोमांचायाकारस्य भक्तिरूपहेतुत्वेन तत्प्रत्यायकेन प्रणामेन गोपनं
हि कृतम् सूक्ष्मपिहितालंकारयोरपि चेच्चित्तग्रहणात्भक्तिसाधारणव्यापारमात्रोपलक्षणात् ततश्च वनलिनीद
ले बलाका मरकतपात्र इव दृश्यते शुक्तिरिति मम संकेतभूविस्तात्वाभावं तदा बलीदालीमित्याद्यपि
सूक्ष्मापलंकारः प्रसरति अत्र श्लोके तावत् किमावयोः संकेतस्थानं भविष्यतीति प्रश्नाशयं सूच
यति कामुके तदभिज्ञया विदग्धया सखीं प्रति साकूतमुक्तमिति सूक्ष्मालंकारोयं ततोत्र बलाकाया
मरकतपात्रप्रतिबिंबितशुक्तिरूपमयात्तस्या निश्चलत्वेन आश्वस्तत्वं तेन तस्य निर्जनत्वं तेन तद्देवा
वयोः संकेतस्थानमिति कामुकं प्रति सूचनं च लभ्यते न चात्र ध्वनिराशंकनीयो दूष्यमानस्या
पि संकेतस्थानप्रश्नोत्तरस्य स्फुटत्वोक्तौ वाविष्कृतत्वात् एवं पिहितालंकारेप्युदाहर्तव्यम् इदं चान्यत्रो
व्यपेयम यत्रासौ वेतसी पांथ स्यादिह गूढो नरसूक्ष्मपिहितव्याजोक्त्युदाहरणेषु भावो न त्वोत्तयावि
ष्कृतः किंतु वस्तुसौंदर्य्यबलादूह्य बोद्धव्य विशेषविशेषितात् गम्यः तत्र वस्तुतो नालंकारत्वं ध्वनि
भावास्पदत्वात् प्राचीनैः स्वोक्त्या विष्करणेन तत्यतंकारहिताल्लीस्युदाहृतत्वात् अस्माभिरप्युदाहृ
तानि प्रावधं हि यत्रासौ वेतसी पांथ तत्रेयं सुतरा सरिदित्यादीनामिति एवं तन्मध्ये नं कामिन्याह सत्र

कु० नं०
५२
53

चनमित्यर्थान्तरकल्पनं प्राभावाविष्कारणमित्यतः प्राकृतिविवित्ते गूढाहरणेऽपि संकेतकालमनसं ५।
त्वंतन्वया व्यंजयेती भामा गूहेतिभावाविष्करणमत्नितेथ्वेवतज्जदलंकारइति गूढोक्तिरन्योद्देश्यं
चेद्यदन्यं प्रतिकथ्यते वृषापेहि परक्षेत्रादागतात्त्रिक्षेत्ररक्षकः यं प्रति किं वक्तव्यं तज्जट स्येमविला
यीतितदेवतदन्यं कंचित्प्रतिश्लेषेणोच्यतेचेत्सागूढोक्तिः वृषेत्याद्युदाहरणम परकलत्रमुपभुंजानं का
मुकंप्रतिवक्तव्यम परक्षेत्रेसस्यानिभक्षयेतमक्षणं केचित्समीपे चरंतं निर्दिश्य कथ्यते नेयमप्रस्तुतप्र
शंसा कार्य्यकारणादिव्यंग्याभावात नापि श्लेषमात्रमप्रकृतार्थस्य प्रकृतार्थान्वयित्वेन विवक्षितत्वा
त तस्य केवलमितर वंचनार्थनिर्दिष्टतया विच्छित्तिविशेषसद्भावात यः पाद्योमे विपाणिंगतोनगणायत
त्येषासपत्नीचमां त्यक्त्वा मामिह प्राप्स्यतीतिगरवेः प्राप्ता गृहाभ्यन्तरं शय्यामात्रसहायिनीपीजनः प्रां
तोनमो सेवते स्वामिन्नाममलालनीयजैनीलक्ष्मीपतेसन्नाम अत्रलक्ष्मीपतिनाम्नोजारस्योपगम ते
८ प्रार्थ्यमानायास्तेष्यवंचनायभगावंतंप्रति आक्रोशस्यप्रत्यापनम विवृतोक्तिःधतिष्कृतंकविना
विष्कृतंयदि वृषापेहिपरक्षेत्रादितिवक्तिसस्सूचनम श्लेषेण संवृतं यथाकथंचित्कविनाविष्क
तंचेद्विवृतोक्तिः वृषापेहीत्युदाहरणे पूर्ववत्तत्संवृतसंसूचनमितिकविनाविष्कृतम यथकाजा ज राम
५२
एनी वाप्प४

विसो

त्तोमा गा विषादं श्वसन मुरु जवं संत्यजोर्ध्वप्रवृत्तं कंपः कोवा गुरुत्ते किमिह बलमिदा जडिमेतेना त्रयाहि प्रत्त्या

घ ख्यानं गुणानामिति भयशमन ख्वैना कारयितुं या यस्मै लक्ष्मीमदाद्धः सदहं तु डातिं मे घनगा यं पयोधिः इदं च

परवृत्तं च नाय गुणना विष्करणम् अपाणिना विष्करतां यथा दृष्टा केशवगोपगाहरजसा किं चिन्त दृष्टं मया

तेनेह स्वलिता स्मिनाथ पतितां किंनाम नालंबसे एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गति

र्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् अत्र कृष्णस्य प्रवृत्तो विषमे मार्गे परिस्खलनमाभिनीतव

त्या तं कामयमानाया गोपिका वचने विषमपथस्खलन पतनत्राणप्रार्थना हूये एतदिति प्रतीयमा

नेनार्थेन गुणं विवक्षितमर्थान्तरसंलेशं संसूचयन्नित्यनेना विष्कृतम् एवं नैषधादिषु चेतोनलं

कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषमिति दमयन्तीवाक्यादिकमप्युदाहरणम् सर्वमिदं शब्द

शक्तिक्रोडीकृतगुणाविष्करणम् अर्थशक्तिमूलगुणार्थाविष्करणे मंत्रणाभेगिसूचितनृपावस्थान

ध्वेदा× यथा गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते किं चैवं विजनस्थयोर्हतजनः संभावयत्य घ

न्यथा इत्या× लसामाश्लिष्य पुलकोत्करां चित्तं तनुं गोपी हरिः पातु नः अत्र गच्छाम्यच्युते त्याद्यामंत्रणे

न त्वया सह रंतुमेतावत्कालं स्थितं तल्लब्धमित्यर्थशक्तिलभ्यं वस्तु ततीयपादेनाविष्कृतम् सर्वमेत

म २

कु०ने०
५६
56

त्कविनिबद्धवक्तृगतमाविष्करणोदाहरणम् कविगतमाविष्करणं यथा सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता क्रियाविशेषणम् ?
कथा योषिताम् दूरादेव विवर्जिताः सुरभयः स्रग्गंधधूपादयः कोपं रागिणि मुंच मय्यवनते दृष्टे प्रसीदाधुनास
त्यं त्वद्विरहाद्भवंति दयिते सर्वा ममांधा दिशः तत्र तावदीर्घ्यमानकलुषितदयिताप्रसादनव्यापारो रूढ इति प्रती
यते द्वितीयार्द्धस्य दृष्टिप्रत्याक्रोशो विवक्षितार्थः सच दृष्टे इत्यस्य पदस्य पुनरुच्चारणेन संभावितरूपता मँगव ४
परवंचनम् मय्याविष्कृतः कविनिबद्धवक्तृगतं परवंचनापर्यंक वितर्कं स्वप्रौढिप्रकटनार्थमिति भेदः युक्तिः परा
तिसंधानं क्रियया मर्मगुप्तये त्वामालिखंती दृष्ट्वान्यं धनुष्पौष्पं करोति किं अत्र पुष्पचापलेखनक्रि
यया मन्मथेनयातिवित्तइतिमान्तुत्पादनेन स्वानुरागरूपमर्मप्रकाशनाय परवंचनं विवक्षितम्
यथावा दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्यातिमात्रं वधूः
कर्णालंबितपद्मरागशकलं विन्यस्य चंचूपुटे व्रीडार्ता विदधाति दाडिमफलव्याजेन वाग्बंधनम् अत्र शु
कवाक्यच्छादनया तन्मुखेन स्वकीयरहस्यनिर्वचनशुश्रूषजनवंचनं कृतं आज्ञोक्तावाकारगोपनं यु
क्तौ तदन्यगोपनमिति भेदः यद्वा व्याजोक्तावाकारगोपनमिह तु क्रियया गोपनमिति भेदः एवं चापांतमालो(
कोहींप्रतोल्पामिति श्लोपि युक्तिरेव लोकप्रवादानुकृतिर्लोकोक्तिरिति गण्यते सहस्व कतिचि(राम ग

५६

न्मासान्मीलयित्वा विलोचने अत्रलोचने मीलयित्वेति लोकप्रवादानुकृतिः यथा वा मदीये वरदरा(
जस्तवे नाभेवर्ततेवरदवांछितदानभावं व्याख्यास्यतोनवहसेवरदानमुडं विश्वप्रसिद्धतरविप्रकुनप्रसू
तेर्यज्ञोपवीतवहनं हि नवल्वपेक्षम् अत्रोत्तरं लोकवादानुवादः वक्रोक्तिर्यत्रलोकोक्तिः स्याद्दर्शी
रणाभिज्ञा भुजंगएवजानीते भुजंगचरणं सखे केनचित्कस्यचिद्धृज्ञातं ए घस्य समीपस्य मन्यं निर्दि(
एपायमेव तस्य वृत्तांतं जानातीत्युक्तवतोऽयमहेः पादानहिरेव जानातीति लोकवादानुवादः अत्र
सचापंचलोकविदित्तेधनार्जनादिव्यापारे सहचारिणो विति तत्तद्विषयत्तयालोकोक्तयनुवादस्य प्रयोज
नेप्सितेरहस्ये पितुर्व्यवव्यापारेपि तस्यापंसहचरइति मर्मोद्घाटनमिति तेन गर्भीकृतम् यः मलयमहतो
ज्ञातायाता विकाशितमाल्लिकापरिमलमेरोभानोग्रीष्मस्य मुत्सहसे यदि घनपटपिंतं तं निःस्नेहं य
एव निवर्त्तने प्रभवति गवांकिं नौबिद्वंस एव धनंजयः अत्र धनातिप्सापाप्तोषितां गना सावीवचनेयए
वर्णोनिवर्त्तने प्रभवति स एव धनंजय इत्यो धजातिप्रसिद्धलोकवादानुवादः अत्रातिसौंदर्यशाति
लीमिमामपहाय धनलिप्सया प्राप्स्थितोऽसोनाभितो हृतिगो प्रापएतस्य निवर्तकत्तु तस्यजेता
धनेनाकस्यतहिष्णुवीकरणे प्रत्याकर्षकत्वात् इर्षितातमेषितागर्भीकृतम् वक्रोक्तिः स्त्रैषकाकुमा

स्य

कु०नं०
५५
55

मपरार्थत्वकल्पनम् मुंचमानं दिनं प्राप्तं नेह नंदी हरांतिके अब्रवमानं मुंच प्रभातप्राया रात्रिरित्याभिप्राणो का
यां वाचि नंदि निं प्राप्तं मामुंचेत्यर्थांतरं श्लेषेणापरिकल्पितम् यथा वा अहो केनेदृशी बुद्धिर्दारुणा तव निर्मि
ता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् इदमाविकृतश्लेषवक्रोक्तेरुदाहरणम् विकृतश्लेषवक्रो
क्तेर्यथा भवित्री रंभोरु त्रिदशवदनग्लानिरधुना स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः इयं यास्यत्यु
मधुना च्चैर्विपदपदवीं वानरचमूर्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः सर्वमिदं शब्दश्लेषमूला या वक्रोक्तेरुदा
हरणम् अर्थश्लेषमूला यथा भिक्षार्थी क्व प्रयातः सुतनु बलिमखे ताण्डवं क्वाद्य भद्रे मन्ये वृन्दावनान्ते क्व नु स
मृगशिशुर्नैव जाने वराहम् बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवात्र वेत्ता लीलासंलाप इत्थं जलनिधिहि
मवत्कन्ययोस्त्रायतां नः काकुर्यथा असमालोच्य कोपस्ते नोचितोयमितीरिता नैवोचितोयमिति तं ताडया
मास मालया अत्र नैवोचितमिति काकुस्वरविकारेणानुचित एवार्थांतरकल्पनम् स्वभावोक्तिः स्वभावस्य
जात्यादिस्थस्य वर्णनम् कुरंगैरुत्तरंगाक्षैस्तब्धकर्णैरुदीक्षितम् य० तौ संभ्रमवेपचालितौ सविधे गुरूणां मार्गप्रदान वपुर्वै
रभसस्खलितानपानौ पार्श्वोपसर्पणमभावपि भिन्नदिङ्कं कृत्वा मुहुर्मुहुरुपासातां सलज्जम् भाविकं भू
तभाव्यर्थसाक्षात्कारस्य वर्णनम् अहं विलोकयेद्यापि युध्यंतेत्र सुरासुराः स्यादनभीपरत्वोद्भावनमिदम् य० एम
अद्यापि तिष्ठति दृशोरिह मुग्धरियं पर्यंतपूरस्तन तटातपतितं प्रवृत्ते वाचं निशम्य नयनं नयनं ममेति किंचित्तदा
समीपे

यदकरोत्स्मितमायतात्ती उदात्तमृद्धिमद्वित्तं श्लाघ्यं चान्योपलक्षणम् सानो यस्याभवद्युद्धं तद्धूर्जटिकिरी
टिनोः इदं श्लाघ्यचरितस्यान्यांगत्वे उदाहरणम् अत्युदाहरणं यथा रत्नस्तंभेषु संक्रान्तप्रतिबिंबशतैर्वृतः
ज्ञातो लंकेश्वरः कृच्छ्रादांजनेयेन तत्त्वतः अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् अर्थदानगिरोऽर्थं
द्रे याचकाः कस्य शौर्याच्चिनः इयमौदार्यस्तुतिः शौर्यस्तुतिर्यथा राजन्सप्ताम्बुकूपाः स्त्वत्पुत्रा पाति
वद्: शताबिनाः त्वद्वैरिराजवनितावाष्पपूरेण पूरिताः संपदस्युक्ताबुदात्तालंकारः शौर्यस्तुत्यलंकारः इतिभे ऋावस्तु
दमाहुः अनयोरनवयोगित्तनयोर्जभिमारणयोः अवकाशो न पर्याप्तस्तत्र बाहुल्ततोतरे अल्पं निर्मितमा
काशमनालोच्यैव वेधसा इदमेवंविधं भाविभवस्याः स्तनमण्डलम् इति सदसदुक्तिरनन्यैनानिश्चया।
त्युक्तेर्भेदः निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् यथा॰
पुराकवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवतीब
भूव प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम् नद्यूतमेतत्कितव क्रीडनं निशितैः शरैः निर्ज्जितो निषेधः निष्ठितः
स्ततोऽत्र प्रयुक्तत्वादर्थान्तरं गमीकरोतीति तेन चारुतान्वितोऽयं प्रतिषेधो नामालंकारः उदाहरणम् युद्धरंगे
प्रत्यवतिष्ठमानं शाकुनिकं प्रतिविदग्धवचनं चेदम् तत्र युद्धस्याक्षद्यूतत्वाभावो निर्ज्ञात एव कीर्त्यमानस्तत्रे
वत्तवप्रागल्भ्यं नप्र देवद्युत्पत्तिग्रहोत्तीत्युपहासं गाम्भीकरोति तच्च कितवेत्यनेनाविष्कृतम् नाविशेषेण नशाक्ति

कु० नं०
५६
56

णानातिनानच्चमस्तुना अप्रतीकारपारुष्याः स्त्रीभिरेवोक्षिप्यः कृताः अत्र स्त्रीणां विर्छेदिनिर्भितत्वाभावः प्र
सिद्ध एव कीर्त्यमानस्तासां विषादातिशयाधिक्यौचित्यमित्यमुमर्थं व्यक्तीकरोतीति स चाप्रतीकारपारुष्या इति प्रती
कारवैरस्योविषादिभिस्तासां विशेषणैर्यत्ता विशेषणेनाविष्कृतः तिसृष्येव विधानं यत्तमाहुर्विध्यलं
कृतिम् पंचमोदंचने काले कोकिलः कोकिलोभवेत् निवृत्तिविधानमनुपपन्नं किंचापितं तदर्थं तिरग
र्भीकरणेन चारुतरमिति तं विधिनामानमलंकारमाहुः उदाहरणे कोकिलस्यकोकिलो विधानमनु व
पपुक्तं सत्तिमधुरपंचमध्वनिशालितया सकलजनहृदयत्वं गर्भीकरोतीति तच्च पंचमोदंचने इति का व
विशेषणेनाविष्कृतम् यथा वा हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणं
रामस्य गात्रमसि निर्भरगर्भखिन्नसीताप्रवासनपटोः करुणा कुतस्ते अत्र रामस्य हस्तं प्रति रामस्य गात्रम
सीति वचनमनुपयुक्तं तद्रामस्येत्यनेन स्वस्यात्यंतं निष्करुणत्वं गर्भीकरोति तच्च निर्भरेत्यादिविशेषणे
नाविष्कृतम् यद्यनयोर्विधिनिषेधयोरुदाहरणेषु व्यंग्यान्यर्थांतरसंक्रमितवाच्यरूपाणि तथापि न ध्व
निभावास्पदानि स्वोक्तौ एव व्यंग्यविशेषाविष्करणात्वात् व्यंग्याविष्करणे चालंकारत्वमेवेति तस्य प्राकृप्र
प्रकरणे स्तुतांकुरैर्व्यवस्थापितत्वात् पूर्वं वाधितौ विधिप्रतिषेधौ आक्षेपभेदत्वेनोक्तौ इह तु प्रतिसिद्धौ विधिप्रतिषे
धौ तत्प्रतिद्वंद्विनावलंकारत्वेन वर्णितावितिभेदः हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते असावुदेति शीतांशु राम

५ ५६

द र्मीनकेयं तु भ्रुवाम् यथा वा एष ते विद्रुमच्छायो मार्गज्वाधरः कस्य नो तनुते तन्वि पिपासाकुलितं म
नः मानेन नेच्छति वारयत्युपशमे क्ष्मामालिखंत्या ह्रिया स्वातंत्र्ये परिवृत्य तिष्ठति करौ व्याधूय धैर्यं गते
तस्मै त्वामनुबध्नता फलमियत्प्राप्तं जनेनामुना यः स्पृष्टो न मदा स एव चरणौ स्पृष्टुं न संमन्यते
इत्याद्युदाहरणम् हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते लक्ष्मीविलासविदुषो कटाक्षा वेंकटप्रभोः
अत्र कार्यविशेषभावतः शैघ्र्यादिप्रत्यायनार्थः कार्यकारणाभेदव्यपदेशः यथा वा आयुर्दान
महोत्सवस्य विनतक्षोणीभृतां मूर्तिमान्विश्वासो नयनोत्सवो मृगदृशां कीर्तेः प्रकाशोपरः आनंदः
कलिताकृतिः सुमनसां वीरश्रियो जीवितं धर्मस्यैकनिकेतनं विजयते वीरः कलिंगेश्वरः अत्र दान
महोत्सवाद्युष्करत्वादिना ध्यवसिते राज्ञि तदायुष्कत्वादिव्यपदेशः इत्थंशतमलंकारा लक्षयित्वा
तो निदर्शिताः प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः रसभावतदाभासभावशांतिनिबंधनाः चत्वारो
रसवत्प्रेयऊर्जस्वी च समाहितम् भावस्य चोदयः संधिः सबलत्वमिति त्रयः अष्टौ प्रमाणालंका
राः प्रत्यक्षप्रमुखाः क्रमात् एवं पंचदशान्यानप्यलंकारान्विदुर्बुधाः तत्र विभावानुभावव्यभिचा
रिभिर्व्यंजितो रतिहासशोकादिश्चित्तवृत्तिविशेषो रसः स यत्रापरस्यांगं तत्र रसवदलंकारः विभावा

कु०लं०
५१
57

उभावाभ्यामभिव्यंजितो निर्वेदात्रेयं त्रिं प्राङ्गो देवतागुरुनृपद्विजकलत्रपुत्रादावभिव्यज्यमाना रतिर्भा ऽत्र
भावः सयत्र परस्यांगं भवति स प्रेयोलंकारः अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभासश्चो
च्यते सयत्र परस्यांगं तदूर्जस्वि भावस्य प्रशमावस्था भावशांतिः तस्या [illegible] परांगत्वे समाहितं
म् भावस्योद्गमावस्था भावोदयः द्वयोर्विरुद्धयोर्भावयोः परस्परस्पर्द्धा भावसंधिः बहूनां भावानां पूर्व
पूर्वोपमर्देनोत्पत्तिर्भावशबलता एतेषामपरांगत्वे भावोदयादयस्त्रयोलंकारः तत्र रसवद्यथा हरणम
मुनिर्जयति योगीन्द्रो महात्मा कुंभसंभवः येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ अत्र मुनिविषयरतिरूपस्य
भावस्याद्भुतरसोंगम् यथा [illegible] यं सारस्तनोत्कर्षीयी नलिनविमर्दनः नाभ्यूरुजघनस्पर्शी नीवीविस्रंस
नः करः अत्र करुणस्य शृंगारोंगम् प्रेयोलंकार एवं भावालंकारस्तूच्यते सयथा कदा वाराणस्याममर
तटिनीरोधसि वसन् वसानः कौपीनं शिरसि निदधानोञ्जलिपुटम् अये गौरीनाथ त्रिपुरहर शंभो त्रिनय
नयन प्रसीदेति क्रोशन् निमिषमिव नेष्यामि दिवसान् अत्र शांतरसस्यैकदेशपदसूचितश्चिंताख्यो
व्यभिचारिभावोंगं य० अत्युच्चाः परितः स्फुरंति गिरयः स्फाराः तथांभोधयस्तानेतानपि बिभ्रती किम राम
पि न श्रांतासि तुभ्यं नमः आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भु ५१

जीवा चलन्तो मुदिताः अत्र प्रभुविषयरतिभावस्य च समती विषयरसभावोंगम् ऊर्जस्वि यथा त्वत्सैन्य
र्थिवसंधरेश्वान्नहत्याः संत्रासतः सत्वरं यांति वीरविवृद्धिं तु सरभसं यातः किरातान्च ने तिष्ठंति त्ति मिताः श
रूढपुलकास्तिविस्मृतो पक्रमा स्तासामनन्तरलेह्यनेरतितरांलोलेरपांगैरपि अत्र प्रभुविषयरतिभावस्य
श्रृंगाररसाभासोंगं यथा वा त्वयि लोचनगोचरं गते सफलं जन्म नृसिंह भूपते अजनिष्ट ममेति सादर
ं युधि विद्विषामपि निहितं बांगणः अत्र कवेः प्रभुविषयस्य रतिभावस्य तद्विषयद्विषन्निरूपो भावाभासो
गम् समाहितं यथा पदपामः किमियं प्रपद्यते हृति स्थैर्यं मया ले वितं किं मां नालपती स्वयं खलु शठः को
पस्त्ययाप्याश्रितः इत्थं ध्योन्मुखितलतादृशि चिरेत स्मिन्नवध्यां तरे सव्याजं हसितं मया धृति हृतो मुक्तः
स्तु वाष्पस्तया अत्र श्रृंगारस्य कोपशान्तिरंगम् भावोदयो यथा तदक्ष्णविभ्रामय्यदपालुरपि दिने निनीषा
मिह वद्विलोकिनी अदर्शि याद्वेन विलिख्य पत्रिणा तवैव हस्तेन समः समागतः अत्र नलं प्रति दमयंत्या
२ औत्सुक्यरूपभावस्योदयः श्रृंगारसस्यांगम् भावसंधिर्यथा एकाभूत्कुसुमायुधेषु शिरिव प्रत्यक्कंपे खाव
तीजेतु मंगलपालिके वपुलकैरन्या कपोलस्थली लोलालीलतणमात्रभाविविरहक्लेशासहा पश्यतो मुग्धा
कर्णायतपक्ष्मवीरभवतः प्रोठहबाडंबरम् अत्र रमण्योः प्रेमरणोत्सुकयोः संधिः प्रभुविषये भावस्यांगम् भाव

कु॰ त॰ शबलत्वं यथा क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं
५८ मुखम् किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति
58 अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां शबलता विप्रलंभशृंगारस्यांगं प्रमाणालंकारे आनंदम्
प्रत्यक्षं यथा क्लांतकांतवदनप्रतिबिंबे भग्नबालसहकारसुगंधौ स्वादुनि प्रणदितालिनि शीते निर्ववार मधु निर्वृतिं प्राप ४
नीन्द्रियवर्गः यथा वा किं तावत्सरसि सरोजमेतदारादाहोस्विन्मुखमवभासते युवत्याः संशय्य क्षणमिति
निश्चिकाय कश्चिद्विब्बोकैर्बकसहवासिनां परोक्षैः पूर्वप्रत्यक्षमात्रमन्यत् विशेषदर्शनजन्यसंशयोत्त
रमेतत्त्वमिति अथानुमानं यथा यथा रंध्रं व्योम्नश्चलजलदधूमः स्थगयति स्फुलिंगानां रूपं दधति च यथा त्मा द्यादधति
कीटमणयः यथा विद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्तथा मन्ये लग्नः पथिकतरुखंडे स्मरदवः समूहे
नायकाः यथा वा यत्रैता लहरीचलाचलदृशो व्यापारयंति भ्रुवं यत्तत्रैव पतंति संततममी मर्मस्पृशो मार्गणाः तच्च
क्रीकृतचापपुंखितशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः पूर्वं रूपकसंकी
र्णमिदमतिशयोक्तिसंकीर्णमिति भेदः शब्दानुमानं यथा विलीयमानैर्विहगैर्निमीलद्भिश्च पंकजैः विक एम
संत्या च मालत्या गतोऽस्तं ज्ञायते रविः यः सौमित्रेर्नतु सेवते तरुतलं चंडांशुरुज्जृंभते चंडांशोर्निशि का ५८
लहरीवदत्यंतचंचलदृशः

कथारभुपतेचंद्रोपमुन्मीलति वर्त्तते तद्धि दितं कथं नु भवता भत्ते कुरंगं यतः क्वासि प्रेयसि हा कुरंगनयने चंद्रान
नेजानकि उपमानं यथा तां रोहिणीं विजानीहि ज्योतिषामत्र मंडले यत्नान्वितारकान्यासः शाकटाकारमा
श्रितः यथा वा अत्र मन्नाथमिवातिसुंदरं दानवारिमिव दिव्यतेजसम् शैलराजमिव धैर्यशालिनं वेद्मि वें
कपतिं महीमतिम् पूर्वोदाहरणे उपमानमूलभूतमतिदेशवाक्यं दर्शितम् अत्रातिदेशवाक्यार्थसादृश्य
प्रत्यक्षरूपमुपमानफलेन सह दर्शितमिति विशेषः शाब्दप्रमाणं यथा विवक्षता दोषमपि च्युतात्मना त्व
येकमीशं प्रति साधु भाषितम् यमामनन्त्यात्मभुवोपि कारणं कथं स लक्ष्यप्रभवो भविष्यति अत्र शिवः
परमेष्ठिनोपि कारणमित्यत्र श्रुतिरूपं शाब्दप्रमाणमुपन्यस्तम् एवं स्मृतिपुराणागमलौकिकवाक्यरू
पाण्यपि शाब्दप्रमाणान्युदाहरणीयानि तत्र स्मृतिर्यथा वलात्कुरुत पापानि संतु तान्यकृतानि वः सर्वा
न्वलकृतान्ममैनकृतान्मनुरब्रवीत् पूर्वं श्रुतिरभिमतार्थप्रमाणत्वेनोपन्यस्ता इह तु स्मृतिरनभिहितार्थे
ल तदर्थप्रणयने प्रमाणतयानीतेति भेदः आचारात्मतुष्ट्योरपि मीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमापकतया
शाब्दप्रमाण एवांतर्भावः तत्राचारप्रमाणं यथा महाजनाचारपरंपरेदृशी स्वनामनामादधते न साधवः अतो
ऽभिधातुं न तद्वत्सहेतुर्न जनः किलाचारमुचं विगायति आत्मतुष्टिप्रमाणं यथा असंशयं क्षत्रपरिग्रह

कु. सं.
५८
59

त्तमायदार्यमस्यामभिलाषि मे मनः सतां हि संदेहपदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तयः अत्र दुष्यंतेनात्म
तुष्टाशङ्कं तत्परिग्रहस्य धर्मत्वं श्रुत्यनुमितमुन्नीयते एवं श्रुतिलिंगादिकमपि मीमांसकोक्तप्रमाणं
सम्भवदिहोदाहर्तव्यम् तत्र श्रुतिर्यथा त्वविहिनाम्नैव वरदो नाधत्से वरमुद्रिकाम् नहि श्रुतिप्रसिद्धा
र्थलिंगमाद्रियते बुधैः अत्र करिगिरीश्वरस्य वरद इत्यभिधानश्रुत्या सर्वाभिलषितदातृत्वसमर्थन
म् लिंगं यथा विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः तनुमूर्तिभिरष्टाभिरित्थंभूतोस्मि सूचितः अत्र
शिवस्य श्रुतिप्रसिद्धसर्वोपकारपृथिव्याद्यष्टमूर्तिपरिग्रहलिंगेन तत्प्रवृत्तीनां लोकानुग्राहकैकप्रयोजनत्वे
समर्थितम् लिंगस्यापि मूलभूतवेदानुपातकतया वैदिकशब्दप्रमाण एवांतर्भावः एवं लौकिकलिंगाना
मपि लौकिकशब्दोन्नायकतया लौकिकशब्दप्रमाणांतर्भावः अतो लोलभ्रूलतया विपक्षदिगुपन्यासे
विधूतं शिरस्तद्वृत्तांतपरीक्षणे कृतनमस्कारो विलक्षस्थितः ईषत्ताम्रकपोलकांतिनि मुखे दृष्ट्यानतः
पादयोर्हस्तक्षेपणसान्निधावपि विधिर्द्वाभ्यां न कालोचितः इत्यादिश्चेष्टारूपं प्रमाणं तत्र नाशंकनीयम् क्व
चिच्च शब्दप्रमाणकल्पनया चमत्कारः य. किमसुलभमीर्ग्लधितैर्जडमन्मसेमयि तिमज्जनुभीमसुतामनं मम
किलम्रतिमाह तद्दर्थिकां नलमुखेंदुपरां विबुधस्मरः अत्र म्रियमाणानां मनस्यैवं द्रुप्रविशत्येतदर्थिकायाः राम
५८

श्रुतेर्नलमुखे विषयत्वे कल्पिते तथाख्याख्यातस्मरवाक्यं प्रमाणमित्ययोपन्यस्तम् अर्थापत्तिर्यथा निर्णीतं शशकमस्ती
तिमध्यं तव नितंबिनि अन्यथानोपपद्येत पयोधरभरस्थितिः यथा वा व्यक्तं बलीयान्यदि हेतुरागमादपूर्वयन्सा
जलधिं नजाह्नवी गंगौघनिर्भर्त्सितशोभं कं धरत्सवर्णमर्णः कथमन्यथा स्यात् अनुपलब्धिर्यथा स्फुटमस
नव्यन दवलितं तन्वि निश्चिन्वते ते तदनुपलभमाना सर्कयंतो विलोकाः कुचतिरिव रघुगत्यहिना पारमाले तदिहमक
रकेतोरिदुजालं प्रमीमः संभवो यथा अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं किंतु त्वदग्रे शरणागता
नां पराभवो नाथ न तेनुरूपः संयेनामकेचिदिह नः प्रथयन्त्यवज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः उत्प
त्स्यतेस्ति मम कोपि समानधर्मा कालोह्ययं निरवधिर्विपुला च पृथ्वी यथा वा भ्रातः पांथ कुतो भवान्नगरतो
वार्त्ता नवा वर्त्तते वाढं ब्रूहि युवा पयोदसमये त्यक्त्वा प्रियां जीवति सत्यं जीवति जीवतीति कृपया तां ना वा तां मया
विस्मृता विलीर्णा पृथिवी जनोपि विविषेः किं किं न संभाव्यते अत्राद्योदाहरणे अभूतपूर्वं मम भावि किं वेति सं
भवप्रमाणमिति द्योर्ध्यं दर्शितः द्वितीयोदाहरणे संभवोपपादककालानंत्यादिकमपि दर्शितम् तृतीयोदाहरणे
कचित् तु संभवोपि कं चेत्करत्तिभेद ऐतिह्यं यथा कल्पांतजीवितगाथयेयं नौ किंकी प्रतिभाति मे एतिजीवं तमानंदो नं वर्ष
प्रवादपारंपर्य शतादपि अत्र लौकिकी गाथेयमित्यनिर्दिष्टवक्तृकं ल नश्वचाहत्वातिशयोपनेभालरलिंहन्यायेन पृष्टगतं कार
रूपतामैतिह्यं ना त्वं स्थितौ तलिणैव क्रियते तत्र तिलतंडुलन्यायेन स्फुटावगम्यभेदानंकारमेलनेससृष्टिः नीरक्षीरन्यायेनास्फु
भवेते तेषां मले टभेदालंकारमेलने संकरः सर्वांगांगिभावेन समप्राधान्येन संदेहेन एकवाचकानुप्रवेशेन चतुर्विधः एवं नं तिह्न
कारणं भवन्या कारा: पंचातंकारा: तत्र संसृष्टिर्यथा कुसुमसौरभलोभपरिभ्रमतभ्रमरसंभ्रमसंभृतशोभया चलितया विदधे
तं भवंमेल
ने लौकिकालंकारणं मे

कु० नं०
६
60

अत्र शब्दालंकारयोरनुप्रासयमकयोः संसृष्टिः लिंपतीव तमोङ्गानि वर्षतीवाञ्जनं नभः असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता (
अत्रोत्प्रेक्षयोरुपमायाश्चेत्यर्थालंकाराणां संसृष्टिः आनंदमंथरपुरंदरमुक्तमाल्यमौलौ हठेन निहिते महिषासुरस्य पा
दांबुजं भवतु मे विजयाय मंजुमंजीरसिंजितमनोहरमंबिकायाः अत्र शब्दार्थालंकारयोः संसृष्टिः अंगांगिभावसंकरो यथा अनुप्रासोप
मा तले ष्ववेपंत महीरुहाणां छायाच्छलादामरुतकंपिताः तौ शशांकसिंहेन तमोगजानां लूनाकृतीनामिव गात्रखंडाः मयो
अत्र शशांकसिंहेनेति तमोगजानामिति च रूपकं यद्यप्यत्र शशांक एव सिंहः तम एव गजा इति मयूरव्यंसकादिसमा
श्रयणेन रूपकवत् शशांकः सिंह इव तमांसि गजा इवेत्युपमितिसमासाश्रयणेनोपमापि वक्तुं शक्यते तथापि लूनाकृती(तो
नामिति विशेषणानुगुण्याद्रूपकसिद्धिः तस्य विशेषणस्य प्रधानेन सहान्वयेन भाव्यं नतु गुणेन गुणानां परार्थत्वाद
संबंधः समत्वात्स्यादिति न्यायेन उपमितसमासाश्रयणे तस्य पूर्वपदार्थप्रधानत्वात् शशांकस्य तमसां च प्राधान्यं
भवेत् तत्र च न विशेषणानुगुण्योर्थान्वयस्वारस्यमस्ति रूपनाशरूपोपचरिता कृतिलवनकर्तृत्वकर्मत्वान्वय
संभवेपि मुख्योर्थान्वयस्वारस्यमेवादरणीयम् अतः स्वरूपनाशकोडीकारेण प्रवृत्तया लक्षणया मूलातिशयोक्त्यारू
पकसिद्धिः तच्च रूपकमुत्प्रेक्षायामंगं तदुत्थापकत्वात् रूपकाभावे हि छायाच्छलेन गात्रखंडत्वावेपन्ते त्येतावदुक्त्या
उपमेव सिद्ध्येत् वेपनादिसाधर्म्यात् न त्वाय्यानां सद्यः कृतगात्रखंडतादात्म्यसंभवनारूपोत्प्रेक्षा ननु शशांके
न लूनाकृतीनां तमसां गात्रखंडत्वावेपंते त्येतावदुक्तावपि सिद्धोत्प्रेक्षा तादात्म्यसंभावनोपपत्तौ लूनाकृति
रूपाधिकविशेषणोपादानात् सत्यं तथोक्तावाकृतिलवनादिपर्यंतरूपकाख्यसमारोपनिमित्ता शशांकतमसोर्हं

राम
६

त्वहं तच्च चेतनवृत्तांतसमारोपरूपा समासोक्तिरपेक्षणीया एवमुक्तो रूपकमिति विशेषः एवमत्रातिशयोक्ति
रूपकोत्प्रेक्षाणां संगांगिभावेन संकरः समप्राधान्यसंकरो यथा अवतु नः सवितुस्तुरगावली समतिलंघि ।।से
ततुंगपयोधरा स्फुरितमध्यगतारुणनायका मरकतैकलतेव नभःश्रियः अत्र पयोधरादिशब्दश्लेषमूलाति
शयोक्त्यनुग्राहितयोत्थाप्यमानेव सवितृतुरगावल्यां गगनलक्ष्मीमरकतैकवल्लीतादात्म्योत्प्रेक्षा नभो
का लक्ष्म्यां नायिकाव्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्थाप्यते पयोधरश्लेषवशोपकारकत्वात् ततश्चो
पर त्प्रेक्षासमासोक्त्योरेकः कालः स्पर्धापेक्षया चारुत्वसमुन्मेषश्चोभयोस्तुल्यत्वं इति विनिगमनाविरहात् समप्रा
धान्यम् यथा वा अंगुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः कुड्मलीकृतसरोजलोचनं चुंबतीव रज
नीमुखं शशी अत्रांगुलीभिरिति वाक्योपमया तत्सामर्थ्यात् मुख्यकुड्मलीकरणे निगीर्णतया तदुपमि
तसमासश्रयणेन लब्धया सरोजलोचनमिति समासोपमया चोपगृहीतयोत्थाप्यमानेव शशिकर्तृकनिशा
शा मुखचुंबनोत्प्रेक्षा निशाशशिनोर्दंपतिव्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्थाप्यते उपपोषकरूपत्वोत्थापक म
त्वाविशेषात् समासोक्तिगर्भतां विना चुंबनोत्प्रेक्षायाः निरालंबनत्वाच्च ततश्चात्राप्युत्प्रेक्षासमासोक्त्योरेकका
लयोः समप्राधान्यं यद्यप्यत्रोपमाभ्यां शशीनिशयोर्नायकत्वेव धर्मौ समर्थ्यते न तु शशिनायकयोर्निशानायिकयो
श्च साधारणो धर्मो साधारणधर्मसमर्पणं चोत्प्रेक्षासमासोक्त्योरपेक्षितम् उत्प्रेक्षायाः प्रकृताप्रकृतसाधारण

५

कु· नं· गुणक्रियारूपनिमित्तसापेक्षत्वात्समासोक्तेर्विशेषणसाम्यमूलकत्वाच्च तथापि वाक्योक्तोपमायामिव कारकस्य म
६१ रीचिभिरिवेत्यन्वयांतरमस्तु वा गम्यान्वयभेदलक्षस्य प्रकृताप्रकृतयोरेकैकविषयस्यार्थद्वयस्य चाभेदाध्यवसाये
61 मा नसाधारण्यं संपाद्य तयोरूपमेयत्वासैसौ तुंगतानिर्वाह्या यथा हृष्टप्रकृतकोटिगतानां मरीचितिमिरसरोजानामप्रकृ
तकोटिगतानां मंजुलीकेशसंचयलोचनानां च तनुदीर्घवरणत्वनीलनीरंध्रत्वकांतिमत्त्वादिना श्लिष्टसा
नां प्राप्तिश्चित्करूपेणाभेदवद्भुगतसादृश्यप्रयोजरूपेणाभेदोप्याप्ति सचात्र विवक्षित एव भेदाभेदोभयप्रधा
नोपमेत्यालंकारिकसिद्धांतात् तत्र प्रयोजनिष्क र्षे न्याये नाभेदार्भ तांशोपजीवनेन साधारण्यं संपाद्य प्रधा
नभूतोपमेयासमासोक्तंगतानिर्वाह्या नहि प्रकाशशीतापनयनशक्तिमतः सोरतेजसः शीतापनयनश
क्तिमात्रेणाशीतालूपयोगिता दृष्टा एवमनभ्युपगमे च पांसोपमर्दमर्पितलं वहारः लुप्तांगरागो हरिचंदनेन
आभातिवालातपरक्तसानुः सनिर्झरोद्गाररवाद्रिराजः इत्याद्युपमादिनिर्वहेत् नहत्राद्रिराजपांस्वयोरुपमानो
पमेययोरनुगतः साधारणधर्मो निर्दिष्टः एकत्र वालातपनिर्झरो अन्यत्र हरिचंदनहारावितिधर्मभेदात् तस्मात्त
त्रातपहरिचंदनयोर्निर्झरहारयोश्च सदृशयोरभेदांशोपजीवनमेवगतिः विनष्टी वृत्तरंगायैः समुद्रः फेनचंदनेन एम
दायकरैरिंदुलिंपतीवलिनाना अत्रोत्प्रेक्षयोः कालभेदेपि समप्राधान्यम् अन्योन्यनिरपेक्षवाक्यद्वयोपात्त ६१
त्वात्तदादायेति फेनचंदनरूपकमात्रोपजीवनेन पूर्वोत्प्रेक्षानपेक्षणात् नचैवं लिंपतीवतमोंगानि इत्युत्प्रेक्षा म

द्रूपस्य संसृष्टिरिवोपमितिर्वाच्यम् लोकसिद्धपैवर्णलेपनयोर्वापर्यव्यापानुकारिणो स्मेराद्यपौर्वापर्येण चारुताति
शयसमुन्मेषतः संसृष्टिर्वेषम्यात्तस्मादर्शादिवदेकफलसाधनतया समप्रधानमिदं मित्वेतद्रूपम् संदेहसंक
रो यथा प्राचीनमपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जनुकन्यावतीर्णा इति समगुणयोगप्रीतयस्त
न्त्रयोरम्रवणकदुनघारणामेकवाक्यविवक्षुः इयमिति सर्वनाम्ना यदिन्दुजं वक्तवतीदुमती विशिष्टरूपेण नि
र्दिश्यते तदा बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोस्सदृशयोरेकस्योपनिदर्शना यदि तेन साम्यरूपेणैव निर्दि
श्यते बिंबभूतोपमेत्यपूर्वप्रस्तावात्समगुणयोगप्रीतियते इति पौरविशेषणो व्याप्यते जदाप्रस्तुते धर्मिणि तद्ध
र्मान्तप्रतिबिंबभूता प्रस्तुतवर्तान्ता रैपरूपंलतितमित्यनध्यवसायात्संदेहः विलीयेन्दुः सा त्वादमृतरसवापी
यदि भवेत्तत्कलंकस्तत्रत्यो यदिच्छविकचं वीवरवनं ततः स्नानक्रीडाजनितजडभावैरवयवैः कदाचिन्मुञ्चेयं
मदनशिखिपीडापरिभवम् अत्र यद्येतावत्स्नापनं संपद्येत तदा तापः शाम्यतीत्येतावत्पर्यंकाविसंरंभश्चे
त्तदोपात्तसिद्ध्यर्थं मूहहती संभावनालंकारः एतावत्साधनं कदापि न संभवत्येवात्तस्मात्तापशान्तिरपि नानकुसु
म कल्पेत्यर्थे कविसंरंभश्चेत्तदोपात्तमिथ्यात्वसिद्ध्यर्थे मिथ्यार्थीतत्कल्पनरूपा मिथ्याध्यवसितिरिति तु म
यथासंभवात्संदेहः एवं सितिकं स्फटिककुम्भान्तस्थितिश्वेतीकृतैर्जलैः मौक्तिकं चेल्लतासूते तत्पुष्पैस्ते समं
यशः इत्यादिष्वपि संभावनामिथ्याध्यवसितिसंदेहसंकरो द्रष्टव्यः भुवनेनारलेम्ब्रंचन्मूले वसति चेत्फलम्।

कु.नं.
६२

62

फलसंदोहमुरुणा नरुणा किं प्रयोजनम् अत्र महोरगवृत्तांते वर्ण्यमाने राजहारूढस्येन वृत्तांतो ऽपि प्रतीयते त-
त्र किं वस्तुतस्तथाभूतोरगवृत्तांत एव प्रस्तुते ऽप्रस्तुतस्येनवृत्तांतस्ततः प्रतीयत इति समासोक्तिः अथवा प्रस्तुत-
श्येनवृत्तांतप्रत्यापनाय अप्रस्तुतमहोरगवृत्तांतकीर्तनमित्यप्रस्तुतप्रशंसा यद्वा वर्ण्यमानमहोरगवृत्तांत-
कीर्तनेन समीपास्थितलश्येनमर्मोद्घाटनं क्रियत इत्युभयस्यापि प्रस्तुतत्वात् प्रस्तुतांकुर इति संदेहः एकवाच-
र्था कानुप्रवेशसंकरस्तु शब्दालंकारयोरेवेति लक्षयित्वा काव्यप्रकाशकार उदाजहार स्पष्टोल्लसत्किरणके-
वि सरसूर्यबिंबविस्तीर्णकार्त्तिकमयो दिनलारविंदोद्यति ष्टा छिदिनलकलापमुखो वसताखेकांधकारमधुपावलि
संकोच अत्रैकपदानुप्रविष्टो रूपकानुप्रासौ यत्रैकस्मिन् श्लोके पदे ऽदेन शब्दार्थालंकारयोः स्वार- स्थितिस्तमत
सिकः वाच्यप्रतियोगिकत्वाद्वाचकत्वस्येति मत्वार्थालंकारयोरप्येकवाचकानुप्रवेशसंकरमुदाजहार संसृष्टिः इहै
सच्छुष्करयोतितरंगशोभितन्यमंदमारुत मृदंगवाद्ये उद्यानवापीपयसि वयस्यामेलीदृशो नाथगृहे ऽसने कस्मिन् अले
अत्र नाथगृहवापीपयसोः सच्छुष्क इत्यादिविशेषणेषु शब्दसाम्यं श्लेषः अमंदमारुत इत्यादिविशेषणतो ऽर्थ- सर्वस्वकार
साम्यमुपमा तदुभयमेकस्मिन्निव शब्दे ऽनुप्रविष्टमिति तदपि न मन्यामहे सच्छुष्कर इत्यादि विशेषणेषु श्लेष- एकस्मिन्वा
मितिकाभेदाध्यवसायरूपातिशयोक्तिलभ्यस्य धर्मसाम्यस्यैव तत्रैव शब्दप्रतिपाद्यतया शब्दसाम्यस्य त- के ऽनुप्रवे
दप्रतिपाद्यत्वात् श्लेषमितिकाभेदाध्यवसायेन धर्मसाम्यालाभानंगीकारे अहोरगवृत्तीसंधाजहातिस्वयमं- च योरेव
वरैम इत्यादिश्लिष्टविशेषणसमासोक्त्युदाहरणे विशेषणसाम्याभावेन समासोक्त्यभावप्रसंगात् शब्दसाम्य योः २ तेम

६

स्येव शब्दप्रतिपाद्यत्वेपि तस्योपमावाचकत्वस्यैव प्राप्त्या श्लेषवाचकत्वाभावाच्च शब्दतोऽर्थतो वा कवि सम
तसाम्यप्रतिपादने सर्वविषेष्ूपमालंकारस्वीकारे अन्यथा यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् इत्यत्राप्युपमा न स्यात् नह्यत्रान्वर्थनाम नामरूपशब्दसाम्यं
विना किंचिदर्थसाम्यं कविविवक्षितमस्ति तस्माद्यत्रैकस्मिन्नर्थे प्रतिपाद्यमानेऽलंकारद्वयलक्षणयोगा
दलंकारद्वयप्रतीतिः तत्र तयोरलंकारयोरेकवाचकानुप्रवेशः यथा विद्रुकापीतिंभादान निष्वंदपूर्णैः
शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् विफलितजलसेकप्रक्रियागौरवेण व्यरचि स हृतचित्तस्तत्र भै
मीवनेन अत्र प्रतिपाद्यमानोऽर्थः समृद्धिमद्वस्तुवर्णनमुदात्तमिति विलक्षणेनोदात्तालंकार
रूपः असंबंधे संबंधरूपकथनमतिशयोक्तिरिति लक्षणेनातिशयोक्तिरूपश्च न च सर्वत्रोदात्तस्यासंबंध
वचनरूपत्वेनातिशयोक्तिरिति न विविक्तालंकारद्वयलक्षणसमावेशो नास्तीति वाच्यम् दिव्यलोकगतसंपत्सम
मृद्धिवर्णनादिष्वतिशयोक्त्यस्पृष्टस्योदात्तस्य सत्त्वोपीदाप्यादिविषयातिशयवर्णनेषूदात्तास्पृष्टायाश्चाति
शयोक्तेश्च परस्परविविक्तत्वाविशेषात् तयोश्चेहार्थनिष्ठसंबंधसमावेशयोर्नाङ्गाङ्गिभावः एकेना
परस्यानुत्थापनात्त्वात् अपातेऽपि विशेषाभावादर्थेनाश्च नापि समप्राधान्यं यैः शब्दैर्हि समृद्धिमद्वस्तु प्र
तिपाद्यते तैरेव तस्यैव वस्तुनोऽसंबंधे संबंधरूपस्य प्रतिपाद्यमानत्वमाभिन्नप्रतिपादकशब्दव्यवस्थिता

कु० नं०
६२
63

र्थभेदाभावान्नापि संदेहसंकरः एकालंकारस्थोग्रांतदलंकारकोटिप्रतिक्षेपाभावात् तस्मादिहोदात्तातिशयो
क्त्योरेकवाचकानुप्रवेशलक्षणसंकरः क्वचित्संकराणामपि संकरो दृश्यते यथा मुक्ताः केलिविसूत्रहारग
लिताः संमार्जनीभिर्हृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः दूराद्दाडिमबीजशंकित
धियः कर्षन्ति केलीशुका यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् अत्रतावद्विद्वत्संपत्समृद्धिव ला
र्णनेनमुदात्तालंकारः तन्मूलकोबालांघ्रिलाक्षारुणत्वमित्यत्रतद्गुणालंकारः तत्रैववस्यमाणभ्रांत्युपपा
लं दकः पदार्थहेतुककाव्यलिंगालंकारश्चेति तयोरेकवाचकानुप्रवेशसंकरः तन्मूलं तेकितत्धीय इत्यत्र भ्रां
तिमदलंकारः तयोश्चोदात्तालंकारस्य चाङ्गांगित्वं इति तयोश्च तस्य चांगांगिभावसंकरः एवोविध विद्वद्
हवैभवस्यहेतुमतो राज्ञो वितरणविलासस्य हेतोश्चाभेदकथनं हेत्वलंकारः सचराज्ञो वितरणविलास
स्य निरतिशयोत्कर्षाभिव्यक्तिपर्यवसायी एतावन्मात्रेकविलसितं भवेश्चेतुकहपोदात्तालंकारपरिष्कृते
हेत्वलंकारे विश्रांतिः वर्णनीयस्य राज्ञः कीदृशसंपत्तिप्रपंचे तस्य निरतिशयैश्वर्यविवितरणरूपा
प्रस्तुतकार्यमुखेन तदीयसंपदुत्कर्षप्रशंसनेकाविसेधभश्चोत्कार्य निबंधनाप्रस्तुतप्रशंसालंकारे वि
श्रांतिः कार्यस्यापि वर्णनीयत्वेन प्रस्तुतत्वाभिप्राये प्रस्तुतांकुरे विश्रांतिः अत्राविशेषानध्यव
सायात्संदेहसंकरः किंच विद्वद्गृहवैभववर्णनस्यासेवंपेसंबंधकथनरूपतयातिशयोक्तेरूपता राम

६२

कु. न.
६४
64

लंकारेण सहैकवाचकानुप्रवेशसंकरः निरतिशयविलासोत्कर्षपर्यवसायिनो हेत्वलंकारस्यास्य प्रकृतातस्योद
र्यवर्णनात्मिकतया पृक्तासहैकवाचकानुप्रवेशसंकरः तन्मूलकस्याप्रशंसालंकारस्य प्रस्तुतांकुरस्य चार
जसंपत्समृद्धिवर्णनात्मकोदात्तालंकारेण सहैकवाचकानुप्रवेशसंकरः वाचकपदस्य प्रतिपादकमात्र
परतया व्यंजकतापारम्याद्रूपोचत्रयाणामेकवाचकानुप्रवेशसंकरेण समप्राधान्यसंकरः नहीतेषां
परस्परमन्यतरस्य वा गत्वमस्ति उदात्तादिमात्रस्यैव हेत्वलंकारादिवाचकानुपादकत्वेनातिशयोक्तिसंकरस्यां
गतयानपेक्षणात् एवमत्र श्लोके चतुर्णामपि संकराणां यथायोग्यं संकरः एवमन्यत्राप्युदाहरणेषु ऊ
ह्यमूह्यानि ॥ अमुं कुवलयानंदमकरोदप्पदीक्षितः नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः चंद्रालो
को विजयते शरदागमसंभवः हृद्यः कुवलयानंदो यत्प्रसादादभूदयम् इति श्रीमदद्वैतविद्याचार्यश्रीम
द्भारद्वाजजलधिकौस्तुभ श्रीरंगराजाध्वरींद्रवरदसूनोरप्पयदीक्षितस्य कृतिः कुवलयानंदः समाप्तः श्रीः

राम
६४

ब्याहुरकाव्य
अं. ७७१